रजतजयन्तीग्रन्थमाला-४

महाकवि-विद्यापतिः



आचार्य डा० जयमन्तमिश्रः




राष्ट्रिय-संस्कृत-संस्थानम्



रजतजयन्तीग्रन्थमाला - 8

महाकवि-विद्यापतिः

जयमन्तमिश्रः





राष्ट्रियसंस्कृतसंस्थानम्
नईदिल्ली
१९९५


प्रकाशकः
डॉ० कमलाकान्त मिश्रः,
निदेशकः
राष्ट्रियसंस्कृतसंस्थानम्
४०-ए, राजागार्डन, विशालएन्क्लेव
नई दिल्ली-११००२७

रजतजयन्तीग्रन्थमाला-8


प्रथमसंस्करणम्—१९९५

वि० सं० २०५२

मूल्यम् : रु० ५०/- रुप्यकाणि



अमर प्रिंटिंग प्रेस
दिल्ली-११००
दूरभाष : ७२५२३



प्राक्कथनम्

'योऽनूचानः स नो महान्' इत्यागमस्योद्घोषं परिदधत् स्वोद्देश्यं साधु निर्वहदिदं राष्ट्रियसंस्कृतसंस्थानं रजतजयन्तीवर्षं पूरयतीति विज्ञाय समेषां विदुषां संस्कृतानुरागिणां च चेतोऽवश्यं मोमुद्येत ।

प्राचीनशास्त्राणां ज्ञाननिधीनां संरक्षणे संवर्धने संस्कृतपरम्पराया राष्ट्रियैकात्मतासंवर्धनशक्तेश्च प्रचारार्थं संस्थानस्य कियदवदानमित्यत्र संस्कृतलोक एव प्रमाणम् ।

अस्मिन् रजतजयन्तीशुभावसरे राष्ट्रस्यास्य विभिन्नप्रान्तेषु विद्योतमानैर्विद्वत्तल्लजैः विविधशास्त्रविषयानवलम्ब्य विरचितानि ग्रन्थकुसुमानि सादरं सञ्चित्य संग्रथ्य च रजतजयन्तीग्रन्थमालात्वेन तत्रभवतां समक्षमुपस्थाप्य महती प्रीतिस्तुष्टिश्चानुभूयेते ।

तत्रेदं कुसुमम्, अस्मदीयां प्रार्थनामङ्गीकृतवद्भिर्धीधनानामग्रिमायां पंक्तौ विराजमानैः पूर्वकुलपतिभिः **डा० जयमन्तमिश्र**महाशयैः प्रणीतः **महाकविविद्यापति**रिति नामा ग्रन्थः मिथिलामहीमण्डलविभूतेरन्वर्थनाम्नः विद्यापतेर्जीवनवृत्तं कृतीश्च साधु परिचाययति । ग्रन्थस्यास्याध्येतारः विद्यापतेः व्यक्तित्वेन वैदुष्येण च परिचिताः सन्तोऽवश्यं लाभान्विताः भवेयुरिति मम विश्वासः ।

ग्रन्थेऽस्मिन् सर्वासां तदीयकृतीनां विषयवस्तुजातस्य संक्षेपेण विवेचनं, वैशिष्ट्यं, तत्र समागतानां दुर्बोधपदानामर्थनिर्देशात्मकं व्याख्यानञ्चात्र सन्त्युपवर्णितानि । व्याकरणसाहित्यविद्ययोर्धुरीणेभ्यः ग्रन्थस्यास्य प्रणेतृभ्यः डा० जयमन्तमिश्रमहोदयेभ्यः भवन्त्वर्पिता अस्मदीयाः सप्रश्रयं कृतज्ञताः ।

अस्या ग्रन्थमालायाः प्रकाशनादिकार्येषु सहयोगाय डा० सवितापाठक-डा० रा० देवनाथन्प्रभृतयः सन्त्यत्र साधुवादार्हाः । अल्पीयसि काले ग्रन्थममुं सम्मुद्र्य यथासमयं विमोचनाय च प्रस्तूय अस्माकं सङ्कल्पसिद्धौ विशिष्टसहयोगाय अमरमुद्रणालयस्याधिकारिणोऽस्माकं धन्यवादभाजःसन्ति ।

कमलाकान्तमिश्रः

दिनाङ्क ११.१०.९५ निदेशकः

कार्तिककृष्णतृतीया २०५२ राष्ट्रियसंस्कृतसंस्थानम्

विद्यापति-पञ्चकम्

अभिनवजयदेव ! श्रीलविद्यापते ! त्वम्
सुजन-सुकवि-कण्ठे हार एवासि नूनम् ।
सरस-मधुर-गाता कोकिलस्त्वं कवीन्द्रः
बुधसदसि धुरीणः कस्य नासीर्नमस्यः ॥ १ ॥

हरि-हर-गणपति-दुर्गाऽऽदित्यान् देवान् समर्च्य संभक्त्या ।
निरताराधन-रक्तस्त्वमेव शक्तोऽभूस्तदीय एकत्वे ॥ २ ॥

विश्ववन्द्योऽसि धन्योऽसि कोऽन्योऽस्ति ते
तुल्यतां यातु काव्ये कला-कौशले ।
राजनीतौ, प्रजारञ्जने, भञ्जने-
शत्रुवर्गस्य, तन्मान-सम्मर्द्दने ॥ ३ ॥

कविवर ! तवगुण-गणनां कर्तुं कस्यास्ति स्वौजसां राशिः ?
सिकता-कण-गणनायां कस्य भवति कृति-साध्यताज्ञानम् ? ॥४ ॥

गुणात्मके वस्तूनि मौनितायां-
वाग्जन्मवैफल्यमसह्यशल्यम् ।
तमेव शल्यं शमितुं विधीयते
मया तरितुं जलधिं प्रयासः ॥ ५ ॥

सुयशोधवलित-विश्वम्
कृति-कृत-संसृति-मानवोपकारम् ।
तं प्रणमति जयमन्तः
विद्यावन्तं गुणाम्बुधिं सन्तम् ॥

अवतरणिका

अभिनवजयदेव-कविकोकिल-कविकण्ठहार-कवीश्वर-महाकविविद्यापतिः सरस-कोमल-कान्त-पदावली-मधुर-रचनया स्वदेशे विदेशे च यथा शरच्चन्द्रम-रीचि-धवलं यशोलभते स्म तथा राजनीतिरत्नाकरावगाहन-नैपुण्येन, सामाजिक-दोष- निर्देश - पुरस्सर - तन्निराकरणोपाय - प्रदर्शकत्वेन, पारस्परिक - विरोधेन विखण्डितायां मिथिलायाम् एक समृद्ध-साम्राज्य-स्थापनार्थं विहित-विविध-प्रया-सकत्वेन, समाज-सुधारकत्वेन, वैष्णव-शैव-शाक्तादिसम्प्रदायमूलक-पारस्परिक-विरोध-निवारणार्थम् शक्ति-हरि-हराद्वैतसिद्धान्तनिरूपणपूर्वकसौहार्दस्थापकत्वेन, बौद्ध-जैन-सनातन-धर्मावलम्बिषु मतभेदनिराकरणपुरस्सर-सौमनस्य-प्रयासका-रित्वेन, तुलुष्काक्रमणजन्य- दलितमनोभावेषुमिथिला-जनेषु धैर्योत्साह-वर्धन-पूर्वक - कर्तव्यपथ - प्रदर्शकत्वेन, कर्मकाण्डविषयक - विधि - विधान - व्यवस्था-पकत्वेन, पुरुषार्थ-चतुष्टय-प्राप्ति-मार्गस्य स्वव्यवहारंद्वारा निर्देशकत्वेन, संस्कृत-प्राकृतावहट्ट-भाषासु प्रदर्शित-प्रावीण्येन,वेद-वेदाङ्ग-स्मृति-पुराण-धर्मशास्त्रेति-हास-रामायणादिग्रन्थ-परिशीलन-जन्य-नैपुण्येन (विशिष्टाः श्लाघ्या अमीगुणाः अमुना विरचितेषु संस्कृत-ग्रन्थेष्वेवोपलभ्यन्ते) महिमानमलभत । अमुष्य यद्यपि महाकवेर्मैथिलीपदावलीतर-संस्कृतावहट्टभाषानिबद्ध-प्रबन्ध-ग्रन्थानां चर्चा पूर्वम-पि जाता, जायते च, किन्तु तस्य समस्त-संस्कृतावहट्टभाषानिबद्ध-कृतिजातस्य एकत्र सुबद्धं परिचयात्मकं पुस्तकं जिज्ञासुजनानां ज्ञान-विवृद्धये परम-प्रीतये च कल्पिष्यते इति निश्चिन्वता राष्ट्रियसंस्कृतसंस्थानेन एकं तादृशं ग्रन्थं निबद्धुमनुरुद्धोऽयं जनः "महाकवि-विद्यापति"रिति विरुदेन भागद्वयात्मकं संस्थान-समुद्देश्य-प्रपूरकं लघु-रूपात्मकमपि समपेक्षित-सकल-विवरणात्मकं पुस्तकं निर्माय विपश्चितां परितो-षाय एतेन कृति-कुसुमाञ्जलिना सुधीसमाजं समभ्यर्च्चयतीति शम् ।

१५-९-१९९५

विदुषामाश्रवः

जयमन्तमिश्रः

विषयानुक्रमणिका

पूर्वभागः

जीवनवृत्तात्मकः

जगज्जननी-जानकी-जनन-परिपूतायाम् आत्मविद्या-विशारद-जनक-याज्ञवल्क्य-गौतम-कणाद-शतानन्दादि-महर्षि-ज्ञान-स्थलीभूतायां कुमारिल-मण्डन-वाचस्पत्युदयन-गङ्गेश-वर्धमान-हलायुध-ज्योतिरीश्वर-चण्डेश्वर-धवलायाम् मीमांसा-न्याय-वेदाध्ययन-पटुतरैः पण्डितैर्मण्डितायां, सरस्वती-लास्य-विलास-रङ्गभूमि-स्वरूपायाम् भूसुर-भूपति-पालितायाम् मिथिलायाम् मधुबनी-मण्डलान्तर्गत-वेनीपट्टीसमीपस्थ-विसपीग्राम-वास्तव्यः काश्यपगोत्रीय-बिसइवार-विसपीमूलकः परमसौभाग्यशालीगणपतिठक्कुर; ख्रीष्टीयचतुर्दशशतक-मध्यभागे व्योम-बाण-वह्नि-विधुमित (१३५०) वत्सरे स्वधर्मपत्न्यां गङ्गादेव्याम् अन्वर्थनामानं विद्यापतिं यशस्करं तनयं लेभे ।

अस्मिन्नवदातवंशे समुत्पन्ना विद्यापतेः पूर्वजाः कर्णाटवंशीयराजानां राज्यकाले न केवलं राजाश्रिता आसन्, अपि तु विशिष्टेषु प्रशासनाधिकारि-पदेषु नियुक्ता राज्यशासनभारं वहन्तः राज्यं सुदृढीकर्तुं प्रजाश्च समाराधयितुमनारतं प्रयतमाना आसन् । मिथिलायाः प्राचीनेतिहास-साक्ष्येण विविधोपलब्धाभिलेख-प्रामाण्येन च निश्चीयते यन्मिथिलायाम् १०९७ ख्रीष्टाब्दात् १३२४/१३२६ ख्रीष्टाब्दं यावत् कर्णाटवंशीयराजानां शासनमासीत् ।

कर्णाटदेशीयः परमारवंशीयः क्षत्रियो नान्यदेवः पारिवारिककलहेन अशान्तः कतिपयैरनुयायिवर्गैः सह कर्णाटात्प्रचलितः वङ्गदेशीयं राजानं विजयसेनं समाश्रित्य तदीयं किमपि विशिष्टम् अधिकारिपदं समवाप्य पश्चात् मिथिलामागत्य स्वयमेव तत्र राज्यं कर्तुमना वास्तुं व्यधात्, अथवा विजययात्राप्रसङ्गे वङ्गराजेन

विजयसेनेन सह सन्नद्धे युद्धे पराजितः सन् ततः पलायमानः मिथिलामागत्य बुद्धिबल-कौशलेन प्राप्त-प्रचुर-विभवेन मिथिलाधिपोऽभवत्, उताहो तीर्थयात्राप्रसङ्गे कर्णाटात् मिथिलामागत्य तत्र राज्यस्थितिमकरोदित्यत्र पुरा विदो मतभेदेन विवदन्ते। यत् किमपि तथ्यं भवतु नाम स मिथिलामहीमशासदित्यत्र नास्ति विचिकित्सा। ततश्च २२७ वर्षाणि यावत् कर्णाटवंशीयानाम् राज्ञामत्र राज्यमासीत्।

नान्यदेव; १०१९ शकाब्दे १०९७ खीष्टाब्दे श्रावणे शुक्लपक्षे सप्तम्यां शनिवासरे स्वातीनक्षत्रे सिंहलग्ने सिद्धयोगे सप्त सकारयोगेन प्रशस्ते समये सिमरौनगढनामके स्थाने वास्तुं व्यधादिति प्रमाणयति अधस्तनस्तत्रत्य-वास्तु-शिलालेखः—

नन्देन्दु-बिन्दु-विधु-सम्मितशाकवर्षे (१०१९)
सच्छ्रावणे सितदले मुनिसिद्धितिथ्याम्।
स्वात्यां शनैश्चरदिने करि-वैरि-लग्ने
श्रीनान्यदेवनृपतिर्व्यदधीत वास्तुम्॥[1]

नेपाल-(मल्लराजानां) वंशावलीति नामके ऐतिहासिके ग्रन्थेऽपि किञ्चित् पाठान्तरेण तथ्यमिदं संसूच्यते। तथाहि—

नन्देन्दु-शून्य-शशि-सम्मितशाकवर्षे (१०१९)
तच्छ्रावणस्य धवले मुनितिथ्यधस्तात्।
स्वात्यां शनैश्चरदिने रिपुमर्दलग्ने
श्रीनान्यदेवनृपति व्र्यदधीत वास्तुम्॥

---

१. मिथिलातत्त्वविमर्शपृष्ठसंख्या– ९८॥
नेपाल उपत्यका को मध्यकालीन इतिहास पृष्ठसंख्या– २९। "श्रीनान्यदेवनृपति-र्विदधेऽथ वास्तुम्" इति म.म. मुकुन्दझा-कृते मिथिलाभाषामय इतिहासे युक्तः पाठः पृ.४६२।

नान्यदेवः स्वराज्यं विस्तारयितुकामः वङ्गाधिपेन विजयसेनेन सह युयुधे, अथवा विजयसेन एव नान्यदेवं करदीकर्तुमभ्यषेण यदित्यत्र यन्नाम तथ्यं भवतु, नान्यदेवः विजयसेनात् तस्मिन् संग्रामे पराजितोऽभवदिति निम्नलिखित-प्रद्युम्नेश्वर देवपारा-शिलालेखेन निश्चीयते—

त्वं नान्यवीर-विजयीतिगिरः कवीनां
श्रुत्वाऽन्यथा मनन-रूढ-निगूढ-रोषः ।
गौडेन्द्रमद्रवदपाकृत-कामरूप-
भूपं कलिङ्गमपि यस्तरसा जिगाय ॥

शूरम्मन्य इवासि नान्य; किमिह त्वं राघव! श्लाघसे,
स्पर्धां वर्धन! मुञ्च, वीर विहितो नाद्यापि दर्पस्तव ।
इत्यन्योन्यमहर्निशं प्रणयिभिः कोलाहलं क्ष्माभुजां
यत्कारागृह-यामिकैर्नियमितो निद्रापनोदक्लमः ॥[1]

एवञ्च नान्यदेवः मिथिलायाः सीमितक्षेत्रे १०९७ तः ११४६ खीष्टाब्दं यावत् राज्यशासनं विदधानः अन्ते परलोकं जगाम । ततस्तत्तनयो गाङ्गदेवः ११४६तः ११८७ खीष्टाब्दं यावत्, तत्पुत्रो नरसिंहदेवश्च ११८७ तः १२२५ खीष्टाब्दं यावद् राज्यं चकार । ततो नरसिंहदेवात्मजो रामसिंहदेवः १२२५ तः १२७६ खी. यावत्, तत्तनूजः शक्रसिंहापरनामकः शक्तिसिंहः १२७६ तः १२९६ खी. यावत्, ततश्च तत् पुत्रः कर्णाटचूडामणिः हरिसिंहदेवः मिथिलामहीमण्डनः १३२४/२६ खीष्टाब्दं यावत् शासनं विदधिरे । नान्यदेववंशजानां मिथिलां प्रशासतामेतेषां पूर्वोक्तक्रमः नेपालस्य इतिहासेनापि प्रमाणितो भवति—

आसीच्छ्रीसूर्यवंशे रघुनृपकुलजो रामचन्द्रो नृपेशः,
तद्वंशे नान्यदेवोऽवनिपतिरभवत् तत्सुतो गाङ्गदेवः ।

---

१. देवपारा शिलालेख श्लोकसंख्या २०,२१ ।

तत्पुत्रोऽभून्नृसिंहो नरपतिरतुलस्तत्सुतो रामसिंहः,
तज्जः श्रीशक्तिसिंहो धरणिपतिरतो भूपभूपालसिंहः ॥
तस्मात्कर्णाटचूडामणिरिव हरियुत्सिंहदेवस्य वंशे
भूपः श्रीयक्षमल्लो नरपतिरतुलो रत्नमल्लोऽप्यमुष्मात्[१] ।

कविवरचन्द्रकविः (चन्दाझा) नान्यदेवात् हरिसिंहदेवपर्यन्तान् कर्णाटवंशीयान् मिथिलास्थराजान् एवमेव निर्दिशति—

शास्ता नान्यपतिर्बभूव तदनु श्रीगाङ्गदेवो नृपः
तत्सूनुर्नरसिंहदेवनृपतिः श्रीरामसिंहस्ततः ।
तत्सूनुः किल शक्रसिंहविजयी भूपालवन्द्यस्ततो
जातः श्रीहरिसिंहदेवनृपतिः कार्णाट-चूड़ामणिः ॥[२]

कर्णाटवंशीया इमे राजानः न्याय्येन मार्गेण राज्यशासनं विदधानाः प्रजानुरञ्जनधर्माणः वर्णाश्रम-व्यवस्था-सुचारुसंचालन-परायणा आसन् । एतेषां राज्यकाले महाकवि-विद्यापतेः पूर्वजाः न केवलं पद-वाक्य-प्रमाण-पारावारीणा धर्मशास्त्रनिबन्धन-प्रवीणा अभूवन्, अपि तु राजनीतिगहन-कान्तार-विचरण-निपुणाश्चाप्यभवन् । अतः सुदूरात् कर्णाटप्रदेशात् समागता अधिगत-मिथिलाधिपत्या राजनीति-निपुणा इमे राजानः प्रारम्भादेव अतिप्रसिद्ध- विसइवारविसपी-कुलोद्भवानां महामनीषिणां साहाय्यं सक्रियसहयोगञ्च राज्यं सुदृढीकर्तुं राज्य-व्यवस्थां सुचारुसंचालयितुं परमावश्यकममन्यन्त । अत एव नान्यदेवः १०९७ ख्रीष्टाब्दे राज्यशासनारम्भे एव विद्यापतेः पूर्वपुरुषं महामनीषिणम् विष्णुदत्तठक्कुरं राज्यशासन-प्रमुखपदे नियोजयामास । दण्डनीति-निपुणस्य विष्णुदत्तठक्कुरस्य साहाय्यं कर्तुं तत्समये एव सान्धिविग्रहिकं तत्तनयं हरादित्यठक्कुरं विशिष्टाधिकारपदे

१. Medieval Nepal, part IV P. 86
२. मिथिला भाषामय इतिहास पृ.४९८ ॥

न्ययुज्यत । नचिरादेव हरादित्यस्य पुत्रं परममेधाविनं कर्मादित्यठक्कुरं च मन्त्रि-पदे नियुयोज ।

कुमारिलस्य प्रसिद्धं गहनं भाट्टमतमधीती विविध-विद्या-विद्योतितान्तः–करणः कर्मादित्यः प्रशासने विशिष्टं सहयोगमकरोदिति वर्णयति गणपति-ठक्कुरः "गङ्गाभक्तितरङ्गिणी" नामके ग्रन्थे—

सद्विद्या-कुलयोर्विशेषमखिलं विज्ञाय नान्यो ददौ
वृत्तिं यस्य पितामहाय मिथिलाभूमण्डालाखण्डलः ।
श्रीधीरेश्वरसूनुरन्वहमसावभ्यस्य भाट्टं मतं
गङ्गाभक्तितरङ्गिणीं गणपतिर्ब्रूते सतां प्रीतये ॥

एवं हि एतेषां[१] निर्देशेन निष्कण्टकं राज्यशासनं कुर्वाणो नान्यदेवः मिथिलायां प्रशस्योऽभवत् ।

राज्ञि नान्यदेवे ११४६ खीष्टाब्दे दिवंगते तत्तनूजो गाङ्गदेवः तस्मिन्नेव वर्षे राज्यमधिरुरोह । कर्मादित्यठक्कुरश्च पूर्ववत् विशिष्टपदे कार्यं कर्तुमनुरुरोध । गाङ्गदेवस्य राज्यारम्भकाले नेपालावनिपतिना गौडदेशाधिपतिना च सह यदा कदा संघर्षोऽभवत् । किन्तु विशिष्टाधिकारिणः कर्मादित्यस्य बुद्धिवैभवेन, कर्णाटादेव नान्यदेवेन सह समागतस्य वटुदासस्य स्वामिभक्तपुत्रस्य श्रीधरदासस्य[२] नीति कौशलेन च महाराजः विजयमादधानः सुचारुरूपेणराज्यं कर्तुं प्रभवति स्म ।

---

१. विष्णुदत्त-हरादित्य-कर्मादित्य ठक्कुराणाम् ।

२. अयमेव श्रीधरदासः "सदुक्तिकर्णामृतम्" रचयाञ्चकार तथा अन्धराठाढ़ीतिनामके प्रसिद्धे ग्रामे कमलादित्यनामक-विष्णुमूर्तिं स्थापयामासेति सूचयति अधस्तनशिलालेखात्मकः श्लोकः—
श्रीमान् नान्यपतिर्जेता गुणरत्नमहार्णवः ।
यत्कीर्तिजनितो विश्वे द्वितीयः क्षीरसागरः ॥
मन्त्रिणा तनयस्यास्य नवरङ्गाब्जभानुना
तेनायं कारितो विष्णुः श्रीधरः श्रीधरेण च ॥

राज्ञो न्याय-दण्डादिव्यवस्थापकः बिल्वपञ्च (बेलोंचे) मूलक-भवेशोपाध्यायात्मजो वर्धमानोपाध्याय आसीत्। अयं हि न्यायालयोपयोगि "दण्डविवेक" नामकं ग्रन्थं व्यलेखीत्, यस्यान्ते विद्यते श्लोकः—

श्री बिल्वपञ्चान्वयसम्भवेन

श्रीमद्भवेशस्य तनूद्भवेन।

श्रीवर्धमानेन[1] विदेहभर्तुः

कृते कृतोदण्डविधौ विवेकः॥

अस्य स्मृति-विवेकः, शान्तिपौष्टिकविवेकः,

तडागामृत लतेत्यादयोऽन्येऽपि ग्रन्थाः सन्ति।

प्रजानुरञ्जको राजा गाङ्गदेवः दरभङ्गानगरे एकं विशालं गङ्गासागरनामक पुष्करमचीरवनत्, दरभङ्गानगरादनतिदूरे स्वनाम-प्रथितम् गङ्गालय-नामकं ग्राममवीवसत्, योहि अद्यापि गङ्गयेति नाम्ना प्रसिद्धोऽस्ति। द्वितीयञ्च गङ्गासागरेति नाम्ना विश्रुतं विशालं तडागम् अन्धरा ठाढ़ी ग्रामे, तृतीयञ्च मधुबनी नगरस्य दक्षिणेभागे भौड़ा-ग्राम समीपे अन्वर्थ नामकं गङ्गासागरमरवानयत्। एवंहि गाङ्गदेवः ११६४ खीष्टाब्दात् राज्यं कुर्वन् ११८७ खीष्टाब्दे स्वोत्तराधिकारिणं तनयं नरसिंहदेवम् ऐहलौकिकराज्याधिकारिणं विधाय स्वयं पारलोकिक साम्राज्यमवाप।

---

१. अयं हि वर्धमानोपाध्यायः (विश्वविश्रुतगङ्गेशोपाध्यायस्य तनयाद् वर्धमानोपाध्यायाद् भिन्नः) आसी नामके ग्रामे मदियाहि तिलाम्ना प्रसिद्धतडागस्य परिसरे मन्दिरे ध्वजाग्रे गरुडमूर्तिमस्थापयत्। १९७३ खीष्टाब्दे प्रसिद्धे दुर्भिक्षे तडागस्य जीर्णोद्धारसमये एकः शिलास्तम्भः प्राप्तः। तत्रोत्कीर्णाभिलेखे प्राप्यते—

जातो वंशे बिल्वपञ्चाभिधाने
धर्माध्यक्षो वर्धमानो भवेशात्।
देवस्याग्रे देवयष्टिध्वजाग्रा
रूढंकृत्वाऽस्थापयद् वैनतेयम्॥

राज्ञो गाङ्गदेवस्य मल्लदेवाभिधानः एकोऽनुजोऽप्यासीत्। अन्वर्थनामायं भ्रात्रा सह विगृह्य दिल्लीश्वरस्य पृथ्वीराजचौहानस्य मातृष्वसेयं कान्यकुब्जाधिपतिं जयचन्द्रं समाश्रित्य तत्प्रियपात्रतां भेजे। किन्तु ततोऽपि विमनायमानः स राज्ञा सह वैमनस्यं भजमानः चिक्कोर (चित्तौर) राज्यं प्रत्याजगाम। पूर्ववाग्युद्धानुसारेण अत्र समागत्य जयचन्द्रः मल्लदेवेन सह युयुधे। जयचन्द्रसैनिकेन सह युद्धं कुर्वाणः स्वपराक्रमेण मल्लदेवः प्रतिपक्षीभूतं महाराजजयचन्द्रं सन्तुतोष ततस्तस्य परम-प्रीति-भाजनमभूत्।

विद्यापतिः पुरुषपरीक्षायां विस्तरेण वृत्तान्तमिमं वर्णयामास। कथामुपसंहरन् लिखति महाकविः—

तच्छौर्यं मल्लदेवस्य स विवेकश्च भूपतेः।
भूते भाविनि काले वा न जातो न जनिष्यते॥[१]

राज्यसिंहासनारूढस्य राज्ञो नरसिंहदेवस्यापि महामन्त्री आसीत् कर्मादित्यः। तत्समये वङ्गाधिपमभियोक्तुकामस्य तुरुष्कशूलतानस्य आदेशे अवहेलां कुर्वाणः तस्य प्रभावमसहमानो नरसिंहदेवः परममित्रेण चाचिकदेवनामकेन चौहानक्षत्रिय कुमारेण सह शहावुद्दीन-मुहम्मद-गोरी-नामकं दिल्लीश्वरं निकषा जगाम। तत्र काफरराजेन सह दिल्लीश्वरस्य संग्रामे स्वकीयेन परम-पराक्रमेण काफरराज्यं पराजित्य नरसिंहदेवः दिल्लीश्वरस्य विशिष्टं पारितोषिकमवाप्य सत्यवीरेत्युपाधिं प्राप्य परमप्रसादमनुभवन् मिथिलामाजगाम।

राज्ञो नरसिंहदेवस्य चाचकिराजस्य च काफरराजेन सह महद् युद्धम्, तत्र नरसिंहदेवेन प्रदर्शितं पराक्रमं च विद्यापतिः सविस्तरं पुरुषपरीक्षायां सत्यवीरक-थायां वर्णयामास।

पाकशासनस्य सुरगुरुबृहस्पतिरिव मिथिलामहीशासकस्य नरसिंहदेवस्य अपरश्च मन्त्री अभूत् सुकृती विश्वविश्रुतदानोत्सवः रामदत्तः यो हि स्वकीये

१. पुरुषपरीक्षा-युद्धवीरकथा, श्लोक संख्या-१४।

"दानपद्धति" नामके ग्रन्थे महाराजनरसिंहदेवस्य शौर्य-पराक्रमं, निष्कण्टकप्रशासनं, दाने कल्पद्रुमत्वं, प्रजानुरञ्जकत्वं च वर्णयति

आनम्र-क्षितिपाल-मौलि-वलभी-प्रत्युप्त-रत्नाकर
ज्योतिः क्षालित-पादपद्मयुगलः श्रीमान् नृसिंहो नृपः।
शौर्यश्री-निकषः प्रशास्ति मिथिलाभूमण्डलं रञ्जयन्
कर्णाटान्वय-भूषणः कृतधियां निर्व्याज-कल्पद्रुमः ॥

मन्त्री तस्य मरुत्त्वतो गुरुरिव श्रीरामदत्तः सता—
माधारः सुकृती समस्तभुवनप्रख्यातदानोत्सवः[१]। इत्यादिः

अयमेव नरपतिः दरभङ्गानगरस्थां दीर्घिकाम्
(अधुना दिग्धीति नाम्ना प्रसिद्धाम्) अचीखनत्।

एवं हि मन्त्रिप्रवरस्य कर्मादित्यस्य रामदत्तस्य च नीति-नैपुण्येन प्रजानुरञ्जन-कार्य-कौशलेन च अष्टत्रिंशद्वर्षाणि यावद् राज्यं कुर्वन् नरसिंहदेवः १२२५ खीष्टाब्दे उत्तराधिकारिणे रामसिंहदेवाय राज्यं समर्प्य स्वयममरपुरातिथिर्बभूव।

रामसिंहदेवः (१२२५-१२७६)

रामसिंहदेवः राज्याधिरोहणं कुर्वाण एव कर्मादित्य-तनूजं देवादित्यठक्कुरं सान्धिविग्रहिकमन्त्रिपदे न्ययुज्यत। एतस्यानुजः भवादित्यः राजवल्लभोऽभवत्।

रामसिंहदेवः स्वयमपि भुजबलशाली परमपराक्रमी चासीद्येन स "भुजबल-भीमः" "भीमपराक्रमः" इत्युपाधिना विभूषितोऽभवत्। मन्त्रि-प्रभावात् तस्य परा-क्रमाच्च तदानीं राज्यं निरुपद्रवमासीत्।

रामसिंहदेवोऽयं न केवलं गुणज्ञः विद्वज्जनवल्लभ आसीत् स स्वयमपि आसीद् विपश्चिदपश्चिमः। तस्य राज्यकाले राजसदसि विदुषां समवाय आसीत्।

१. मिथिला भाषामय इतिहास पृ.४८१।

ततसमये अनेके धर्मशास्त्र-निबन्धा निबद्धा अभूवन्। एतेषु "भुजबलभीमस्य" "भीमपराक्रमस्य" नाम्नापि ग्रन्था गुम्फिता अभूवन्।

अयं हि दरभङ्गायां 'रामदीर्घिका'मखानयत् या इदानीम् 'रामदिग्धी' ति नाम्ना कामेश्वरसिंहसंस्कृतविश्वविद्यालयस्य लक्ष्मीश्वरविलासभवनस्य पश्चिमे भागे विराजते। अत एव तत्पश्चिमभागः 'रामवाग' इत्यभिख्यां भजते।

राज्ञो रामदेवसिंहस्य परमसौभाग्यवती महिषी आसीत् सौभाग्यदेवी। एतस्या आज्ञया दरभंगानगरस्यानतिदूरे हयाघाट-समीपे हावीडीहाभिधाने पट्टने कर्मादित्यः एकं मन्दिरं निर्माप्य तत्र कर्णाटकुलदेवताहैहट्टदेवी-मूर्तिमस्थापयत्। देव्याः सिंहासन-शिलापट्ट-समुत्कीर्णाधस्तनश्लोकः तथ्यमिदं समुद्घाटयति—

अब्दे नेत्र-शशाङ्कपक्षगदिते श्रीलक्ष्मण-क्ष्मापते-
र्मासि श्रावणसंज्ञके मुनितिथौ स्वात्यां गुरौ शोभने।

हावीपट्टनसंज्ञके सुविदिते हैहट्टदेवी शिवा
कर्मादित्यसुमन्त्रिणेह विहिता सौभाग्यदेव्याज्ञया।।[१]

महाराजरामसिंहदेवस्य सान्धिविग्रहिकमन्त्रिणो देवादित्यस्य सप्तर्षय इव देदीप्यमानाः सुरासुराचार्य इव नीतिशास्त्रनिपुणा निगमागमकुशला विश्रुताः सप्त तनया अभूवन्। मिथिलापञ्जीप्रबन्धानुसारेण एषु क्रमशः—

१. वीरेश्वरः-भाण्डागारिकः,

२. धीरेश्वरः-महावार्तिकनैबन्धिकः,

---

१. अत्र 'नेत्र-शशाङ्क-पक्षे' ति निर्देशात् २१२ लक्ष्मणाब्दस्य तदनुसारम् १३२१ ख्रीष्टाब्दस्य बोधात् मन्त्रिणः कर्मादित्यस्य शरदां शतादप्यधिककाले जीवित्वे एव एतत् संभाव्यते। श्लोके नेत्र-शशाङ्क पक्षेत्यत्र दक्षस्थाने भ्रमात् पक्षस्य पठनात् समस्येयं प्रादुरभवत्। दक्षशब्देन एक संख्यायाबोधात् ११२ लक्ष्मणाब्दे १२२१ ख्रीष्टाब्दे सति रामदेवसिंह-सौभाग्यदेवी-कर्मादित्यानां समकालिकत्वेन सर्वमञ्जसासामञ्जस्यं भजति।

३. गणेश्वरः-महामहत्तकः,

४. जटेश्वरः-भाण्डागारिकः,

५. हरदत्तः-स्थानान्तरिकः,

६. लक्ष्मीदत्तः-मुद्राहस्तकः,

७. शुभदत्तश्च-राजवल्लभः आसन् ।

विद्यापतेः पूर्वजेषु अनेके महत्तका महामहत्तकाश्चाभूवन् । पञ्जीप्रबन्धे—

महत्तको धनाढ्ये तु पञ्ज्यां शर्मा पुरोहिते।

दानपात्रे द्विजे चैव प्रतिहस्तः प्रकीर्तितः ॥

इति निर्देशात् इमे राजाश्रिताः ठक्कुरमहाभागा धनाढ्याआसन्निति निश्चीयते ।

एवं हि मन्त्रिप्रवर-देवादित्य-प्रसादात् सुप्रबन्धेन सुशासनं कुर्वन् प्रजा अनुरञ्जयन् वापीकूपारामतडागादिकं निर्मापयन् रामसिंहदेवः १२७६ खीष्टाब्दे परलोकं जगाम ।

महाराजशक्रसिंहः (१२७६-१२९६)

महाराजे रामदेवसिंहे दिवंगते तस्मिन्नेव १२७६ खीष्टाब्दे शक्रसिंहः राज्यसिंहासनमारुरोह । सान्धिविग्रहिकदेवादित्यठक्कुरः पूर्ववत् एतन्महाराजस्यापि तस्मिन् प्रधानपदे विद्यमान आसीत् ।

अयं हि देवादित्यः अलौकिकसिद्धिसम्पन्नः, "मन्त्ररत्नाकर"—प्रभाव-प्राप्त-महाबलः, प्रत्यर्थि-भूपाल-मत्तमातङ्ग-मदापहरण-पञ्चाननः, मन्त्रीन्द्रचूडामणिरासीदिति वर्णयति तस्य पौत्रः धीरेश्वरतनूजः महामहत्तक-चण्डेश्वरः स्वकीये "कृत्यचिन्तामणि" ग्रन्थे—

आसीन्मैथिल-तीरभुक्तिविषये मन्त्रप्रभावाहत-

प्रत्यर्थि-क्षितिपालकान्धतमसश्चक्रो द्विजानां प्रियः ।

नित्योल्लासितमण्डलः सुमनसामर्ध्यश्च पद्माश्रयो-
देवादित्य इति त्रिलोकमहितो मन्त्रीन्द्रचूडामणिः ॥

रणस्तम्भदुर्ग (रणथम्हौर किला) प्रतापिनो नृपते वीरहम्मीरस्य विजेता, लोकमहितो देवादित्यः राज्यलक्ष्म्या विधाता, दीनानुकम्पनपरो जङ्गमः कल्पवृक्ष आसीदिति तत्रैव वर्णितेऽधस्तनपद्ये प्राप्यते—

स्रष्टासौ राजलक्ष्म्याः सचिवकुलगुरुस्तेजसा विश्वसाक्षी
दीनानाथानुकम्पा-परवश-हृदयो जङ्गमः पारिजातः ।
दृप्यत् सेनापतीनामपथगतिमतां बुद्धिसिन्धोरगस्त्यो-
हम्मीर-ध्वान्तभानुर्निखिलनिजगुणैस्तोषयामास विश्वम् ॥
महादानैस्तैस्तै र्विभवमहितैर्नन्दितमभूत्
कुलं भूदेवानां बहुविधमखैस्तैर्मखभुजाम् ।
तडागैरारामैः कमल-मधुपानोन्मद-नदद्-
द्विरेफश्रेणीनामुपकृतमनेन क्षितितलम् ॥

अपि च आदिकालाद् विविधाधिव्याधिसमाकुलेयं धरित्री तदानीं कार्णाटराजमन्त्रिणो नय-विनय-दानादिव्यवस्थया सुखमनुभवति

फूत्कारोपहताफणीन्द्रशिरसि, क्रोडानने दंष्ट्रया
विद्धा, कूर्मकठोर-पृष्ठ-कषणैः पीडामुपेताचिरम् ।
कार्णाटाधिपमन्त्रिणि प्रविलसत्कीर्तिप्रताने महा-
दानौघव्यसने नयैकसुहृदि क्षोणीसुखं वर्तते ॥[1]

---

१. मिथिला भाषामय इतिहास पृ. ४८८ ।

देवादित्यस्य ज्येष्ठतनयः नय-विनयादिसमस्तगुण-विशिष्टः सान्धिविग्रहिक-सप्रक्रियमहावार्तिकनैबन्धिक-महामहत्तक-वीरेश्वरठक्कुरः पितुः प्रधानमन्त्रित्व-समये एव उपमन्त्रि-पदे नियुक्तो बभूव। एतत्समये एषां निवासः महत्तकपुरे वर्तमानंमहथौर- ग्रामे) आसीत्।

मन्त्रिणः षाड्गुण्यप्रयोगप्रभावात् प्राप्त-प्रबलशक्तिकः युद्धकलाकुशलः शक्रसिंहः तदानीन्तनेन दिल्लीसिंहासनस्थेन अलाउद्दीनखिलजी-नामकप्रशासकेन सह सख्यमकरोत्। एकदा दिल्लीश्वरस्य सेनापतिः महिमसाहि- (मीर मुहम्मद) नामकः नृपतेः कस्मादपि कोपाद्भीतः' सन् दिल्लीतः पलायमानः रणस्तम्भदुर्गे हम्मीर-वीरस्य शरणापन्नो बभूव। दिल्लीश्वरेण अनुरुद्धोऽपि हम्मीर-वीरो यदा शरणागतं तं सेनापतिं न तत्याज तदा तत्र तदर्थं महद्युद्धमभूत्। हम्मीरात् वारद्वयं पराजितः दिल्लीश्वरः शक्रसिंहदेवादित्य-वीरेश्वराणां सक्रियसहयोगेन पराक्रमेण च तृतीये युद्धे विजयीबभूव हम्मीरवीरञ्चावधीत्। अत एव देवादित्यः हम्मीर-ध्वान्तभानुरित्येवं रूपेण विरुदेन वर्ण्यते। देवादित्यस्य पराक्रमं बुद्धिकौशलञ्चाव-लोक्य दिल्लीश्वरः एनम् "मन्त्रिरत्नाकरे" त्युपाधिना समभूषयत्।

महाकविर्विद्यापतिस्तु शरणागतवत्सलं दयादानपरायणं वीरहम्मीरदेवं सुकृतिनं संस्तुवन् पुरुषपरीक्षायां दयावीरकथायामेव वर्णयति—

ते प्रासादा निरुपमसुखास्ताः प्रसन्ना स्तरुण्यो-
राज्यं तच्च द्रविणबहुलं ते द्विपास्ते तुरङ्गाः।
त्यक्तुं यन्न प्रभवति परः किञ्चिदेकं परार्थे
सर्वं त्यक्त्वा समिति-पतितो हन्त हम्वीरदेवः॥[१]

---

१. पुरुषपरीक्षा-दयावीरकथा श्लोक संख्या ७।
अप्पय्यदीक्षितोऽपि कुंवलयानन्दे हम्वीरवीरपराक्रममेवमवर्णयत्—
''मुञ्चति मुञ्चति कोशं भजति च भजति प्रकम्पमरिवर्गः।
हम्वीर-वीर-खड्गे त्यजति त्यजति क्षमामाशु॥"
एकेनान्येनापि कविना हम्वीर भूपस्य पराक्रमः प्रकारान्तरेण वर्णयाञ्चक्रे—

सान्धिविग्रहिक-वीरेश्वरो यदा राज्य-प्रशासने प्राधान्यमभजत तदायं मधुबनी-पण्डौलयोर्मध्ये 'दहिभत' नामक-ग्राम-निकटे सागरायमाणं वीरसागरनामकं पुष्करमखानयत्। एतत्पश्चिम पार्श्ववर्ती ग्रामः वीरसागरः (वर्तमान वीरसायर) नाम्ना प्रसिद्धोऽभवत्। एतद्ग्राम-वास्तव्यो-विद्वद्वरेण्यः मम श्वशुरः श्रीजीवनाथरायः अनेकप्रसङ्गे एतद्विषयकाणि उपाख्यानानि आख्यत्।

राज-प्रसादाल्लब्ध-विपुल-विभवो वीरेश्वरः अवाम-रामपुरेत्यादिग्रामान् श्रोत्रियेभ्यो ददे। विविधानि यज्ञानुष्ठानानि, अनेकानि विशिष्टानि जनहितकार्याणि च विदधे। अयं धर्मशास्त्र-दण्डनीतिशास्त्र-विशेषज्ञः समस्तप्रक्रियाविराजमान-महावार्तिक-नैबन्धिकश्चासीत्। एतस्य छन्दोगसंस्कार-नामको ग्रन्थः अमुष्य वैदुष्यं प्रकाशयति। तथा हि—

देवादित्य-कुले जातः ख्यातस्त्रैलोक्यसंसदि।

पद्धतिं विदधे धीमान् श्रीमान् वीरेश्वरः स्वयम्॥

एतेनैव ग्रन्थेन सूच्यते यत् काश्यपगोत्रीयोऽप्ययं सामवेदी आसीत्। अतोगोमिलगृह्यसूत्रानुसारिणीं छन्दोगपद्धतिं विरचयाञ्चकार। विद्यापतेः प्रपितामहेन धीरेश्वरठक्कुरेण विरचिता एकाऽपरापि "छन्दोगपद्धतिः" प्राप्यते।

महाराजहरिसिंहदेवस्य प्रधानामात्यपदमलङ्कुर्वाणेन सप्तरत्नाकरकारेण महामहत्तकचण्डेश्वर-ठक्कुरेण कृतं स्वपितामहदेवादित्यस्य पितृचरणवीरेश्वरस्य च अधस्तनपद्यकदम्बम् एवं प्रशस्तिं पल्लवयति—

माचक्र ! चक्रि-विरहज्वरकातरोभूः
संकोचमम्बुज ! न याहि न यामिनीयम्।
हम्बीरभूप-हय-पाद-विदीर्णभूमि-
रेणूत्करैरयमकारि दिवान्धकारः ॥मिथिला तत्त्वविमर्श पृ. १२०।
एतेन हम्वीरभूपालः वस्तुतो विशालपराक्रमः महान् योद्धासीदित्यवगम्यते।

अस्ति श्रीहरिसिंहदेवनृपतिर्निःशेषविद्वेषिणां
निर्माथी मिथिलां प्रशासदखिलां कर्णाट-वंशोद्भवः ।
आशाः सिञ्चति यो यशोभिरमलैः पीयूषधाराद्रवै-
र्देवः शारदशर्वरीपतिरिवाशेषप्रियम्भावुकः ॥ १ ॥

अस्मिन् दिग्विजयोद्यते बलभरात् कुब्जीभवद्भिः फणै-
रन्योन्यं निविडं मिलद्भिरमितः शेषः सहस्रेण सः ।
गच्छत्यम्बुजबान्धवे दिनपतौ प्रत्यक्पयोधेरधः
सद्यः संकुचदब्जकोरकवपुः सादृश्यमालम्बते ॥ २ ॥

मा मा खेदं भजध्वं जलधिमुपगते बान्धवे पङ्कजाना-
मन्तःपञ्चेषुरोष-व्यसन-भय-जुषाश्चक्रवाका वराकाः ।
श्रीमत्कर्णाटभूमीपतिमुकुटमणिः प्रीणयन्नद्य लोका-
नेष प्रौढप्रताप-द्युमणिरुदयिनीं सम्पदं सन्तनोति ॥ ३ ॥

एतस्याद्भुतसन्धि-विग्रह-धुरां वोढा पवित्रीकृत-
क्ष्मालोकः शरदिन्दुसुन्दरयशस्सन्दोह-गङ्गाम्बुभिः ।
आसीन्मन्त्रमयद्युति-प्रतिहता मित्रान्धकारोदयो-
देवादित्य इति प्रसन्नहृदयो देवद्रुमो जङ्गमः ॥ ४ ॥

महादानैस्तैस्तैर्विभवमहितैर्नन्दितमभूत्
कुलं भूदेवानां बहुविधमखैस्तैर्मखभुजाम् ।
तडागैरावासैः कमलमधुपानोन्मद-नदद्-
द्विरेफश्रेणीनामुपकृतमनेन क्षितितलम् ॥ ५ ॥

गुणाम्भोधेरस्मादजनि रजनीजानिरुदधे-
रिवाम्भोजाद्देवो द्रुहिण इव मन्त्रीशतिलकः ।
नवं पीयूषांशोरमृतमिव शक्तिप्रणयिनो-
नयादर्थः श्लाघ्यादिव जगति वीरेश्वर इति ॥ ६ ॥

लक्ष्मीभाजो द्विजेन्द्रानकृतकृतमतिर्यो महादानदानैः
प्रादत्तोच्चैरवामप्रभृतिपुरवरं शासनं श्रोत्रियेभ्यः ।
वापीञ्चक्रेऽब्धि-बन्धुं दहिभत-नगरे निर्जितानेकदुष्टः
प्रासादस्तेन तुङ्गो व्यरचि सुकृतिना स्वर्ग-सोपान-मार्गः ॥ ७ ॥

यः सन्धि-विग्रह-विधौ विविधानुभावः
शौर्योदयेन मिथिलाधिपराज्यभारम् ।
निर्मत्सरं सुनय-संचित-कोषजातम्
सप्ताङ्गसंघटनसम्भृतमेव चक्रे ॥ ८ ॥

प्रज्ञावतां सदसि संसदि वाक्पटूनां-
राज्ञां सभासु परिषत्स्वपि मन्त्रभाजाम् ।
चित्तेऽर्थिनाञ्च कवितास्वपि सत्कवीनाम्
वीरेश्वरः स्फुरति विश्व-विलास-कीर्तिः ॥ ९ ॥

श्रीमानमुष्य तनयो नवचन्द्रचारु-
राचार-वन्द्य-नव-कल्पतरु-प्ररोहः ।
सत्सन्धि-विग्रह-धुरीण-पदावलम्ब-
श्चण्डेश्वरो विजयते सचिवावतंसः ॥ १० ॥

एवं वर्णितविशिष्टप्रभावस्य गुणगणगरिष्ठस्य वीरेश्वरस्य तदनुजानां धीरेश्वर-गणेश्वर-प्रभृतीनां दण्डनयानुकूलसक्रियसहयोगेन राज्यं कुर्वाणः शक्रसिंहः १२८६ खीष्टाब्दे शक्रपुरातिथिर्बभूव।

महाराजहरिसिंहदेवः (१२९६-१३२४/२६)

महाराजशक्रसिंहस्य स्वर्गारोहणसमये हरिसिंहदेवः अपूर्णद्वितीयवर्षो बालः एक एव राज्याधिकारी आसीत्। अतोऽस्यैव अत्यल्पेऽपि वयसि राज्यसिंहासने अभिषेकोऽभवत्। द्विहायनस्यास्य संरक्षणं, सम्यक्परिपालनम्, राज्यप्रशासनञ्च तदानीमपि राज्यधुरं वोढुं समर्थस्य कर्णाटराज्यप्रबन्ध-कन्धरस्य देवादित्यस्य निर्देशेन सहयोगेन च सुचारुरूपेण अभूवन्। एतस्य सप्त महारथिनः नीतिनिपुणास्तनया अपि विशिष्टपदेषु नियुक्ता अभवन्। तत्र महामहत्तक-वीरेश्वरः सान्धिविग्रहिकपान्नागारिकमन्त्रिपदे नियुक्तो बभूव। धीरेश्वरः महावार्तिकनैबन्धिकरूपेण विश्रुतोऽभवत्। गणेश्वरः सप्रक्रिय-महासामन्ताधिपति-महामहत्तकरूपेण ख्यातिमलभत। जटेश्वरः भाण्डागरिकतामवाप। हरदत्तः स्थानान्तरिकपदमलञ्चकार। लक्ष्मीश्वरः नामानुरूपं मुद्राहस्तकपदं व्यभूषयत्। शुभदत्तश्च राजवल्लभो बभूव।

नचिरादेव देवादित्यस्य पौत्रः वीरेश्वरस्यात्मजः सप्तरत्नाकरकारः सद्रत्नरत्नाकरः चण्डेश्वरः महामात्यपदमलञ्चकार। ततश्च मन्त्रिपरिषदि स्वकीयैरलौकिक-दिव्यातिदिव्य-गुणगणैः सान्धिविग्रहिकपदं महासेनाधिपतिपदञ्च विभूषयाञ्चकार।

कालक्रमेण हरिसिंहदेवे राज्यभारं वोढुं समर्थे सति इमे शास्त्रपारङ्गताविपश्चिदपश्चिमा राज्यशासनाधिकारिणः स्वस्वदायित्वं निर्वहन्तः निर्वाहयन्तश्च सारस्वत कर्मण्यपि संलग्ना बभूवुः।

महामहत्तक-चण्डेश्वरः गृहस्थरत्नाकर-कृत्यरत्नाकर-विवादरत्नाकर-नीतिरत्नाकर-शुद्धिरत्नाकर-व्यवहार रत्नाकर-पूजारत्नाकरेतिनामकान् सप्त रत्नाकरान्,

एवंविधानन्यानपि ग्रन्थान् रचयाञ्चकार। ओइनवार-वंशीयनृपतेः भवेश्वरस्य निदेशात् "राजनीति रत्नाकरम्" रचयामास।[१]

विद्यपतेः प्रपितामहः धीरेश्वरठक्कुरः "छन्दोगपद्धतिं" निरमादिति पूर्वमेव सूचितम्।

महासामन्ताधिपति-महामहत्तकमन्त्री गणेश्वरः "आह्निकोद्धार" नामकं "गयापत्तलक" नामकञ्च पुस्तकं प्रणीतवान्। विद्यापतिः पुरुषपरीक्षायां—

सुबुद्धिकथायां गणेश्वरमेवं वर्णयति—

गणेश्वर-गुणग्रामं गुणिनो गणयन्ति ये।
नूनमम्भोनिधेरम्भः कुम्भैराकलयन्ति ते॥[२]

गणेस्वरठक्कुरनिदेशेन खौवालवशतिलकः प्रतिहस्तो भवशर्मा "सुगतिसोपान" नामकं ग्रन्थमरीरचत्, यस्यारम्भे देवादित्य-वीरेश्वरगणेश्वर-गुणगौरवं निम्नप्रकारेण वर्णयति—

अभूद्देवादित्यः सचिवतिलकोमैथिलपते-
र्निजप्रज्ञा-ज्योतिर्द्दलित-रिपु-चक्रान्धतमसः।
समन्तादश्रान्तोल्लसित-सुहृदकेपिलमणौ
समुद्भूते यस्मिन् द्विजकुलसरोजैर्विकसितम्॥ १॥

अस्मान् महादान-तडाग-याग-
भूदान-देवालय-पूतविश्वः।
वीरेश्वरोऽजायत मन्त्रिराजः
क्ष्मापाल-चूडामणि-चुम्बिताङ्घ्रिः॥२॥

---

१. *राज्ञा भवेशेनाज्ञप्तो राजनीति-निबन्धकम्।*
तनोति मन्त्रिणामार्यः श्रीमान् चण्डेश्वरः कृती॥
राजनीति-रत्ना-प्रथमतरङ्ग-श्लोक संख्या २।

२. पुरुषपरीक्षासुबुद्धिकथाश्लोकसंख्या-६।

लसन्महीपालकिरीटरत्नरोचिच्छटारञ्जितपादपद्मः ।
अस्यानुजन्मा गुणगौरवेण गणेश्वरो मन्त्रि-मणिश्चकास्ति ॥३ ॥

संशोषयन्ननिशमौर्वीनभप्रतापै-
गौंडावनी-परिवृढं सुरतान[१] सिन्धुम् ।
धर्मावलम्बनकरः करुणार्द्रचेता-
यस्तीरभुक्तिमतुलामतुलः प्रशास्ति ॥ ४ ॥

श्रीमानेष महामस्तकमहाराजाधिराजो महा-
सामन्ताधिपतिर्विकस्वरयशःपुष्पस्य कल्पद्रुमः ।
चक्रे मैथिलनाथ-भूमिपतिभिः सप्ताङ्गराज्य-स्थिति-
प्रौढानेकवशंवदैकहृदयो दोःस्तम्भ-सम्भावितः ॥ ५ ॥[२]

सच्चित्त-वितत-निकराहरण-प्रवीणः
शिष्या इवेह विलसन्ति गुणा यदीयाः ।
खौवालवंश-तिलकं भवशर्मसंज्ञं
प्रज्ञाविनिर्जितमुरारिपदं नियुज्य ॥ ६ ॥

वेद-स्मृति-पुराणादि दृष्ट्वा लोकहितैषिणा ।
कृतं सुगतिसोपानं श्रीगणेस्वरमन्त्रिणा ॥ ७ ॥

गणेश्वरस्यात्मजः रामदत्तठक्कुरः मन्त्रिपदमलकुर्वन् पारस्करगृह्यानुसारिणीं वाजसनेयीसंस्कारपद्धतिं रचयाञ्चकार । ग्रन्थादौ सोऽपि पूर्वजानां प्रशस्तिमेवं विशदयति—

१. सुरतान=सुलतान ।

२. गणेश्वर-तनूजन्मा गोविन्ददत्तोऽपि स्वकीये गोविन्दमानसोल्लासाभिधे ग्रन्थे तातपाद-प्रशस्तौ श्लोकमिमं समुल्लिखति ।

सन्धि-विग्रह-मन्त्रीन्द्र-देवादित्यतनूद्भवः ।
भूमिपाल-शिरोरत्न-रञ्जिताङ्घ्रि-सरोरुहः ॥
सान्धिविग्रहिकः श्रीमद्वीरेश्वर-सहोदरः ।
महामहत्तकः श्रीमान् विराजति गणेश्वरः ॥
श्रीमता रामदत्तेन मन्त्रिणा तस्य सूनुना ।
पद्धतिः क्रियते रम्या धर्म्या वाजसनेयिनाम् ॥

सान्धिविग्रहिक-महामहत्तक-चण्डेश्वरस्य महामन्त्रित्वे महाराजहरिसिंह-देवोऽपि नवयौवनमारूढः प्रबलपराक्रमः नेपालावनिमभियोक्तुकामः सपरिकरः सन्नद्धोऽभवत् । तत्र प्रथमयुद्धे किरातराज-सहितान् अन्यांश्च भूपालान् विजित्य नेपालाधिपतिर्बभूव । तद्विजयोपलक्ष्ये अनेकानि आम्रवणानि, कदल्युपवनानि, अनेकांश्च ग्रामान् स सद्विप्रेभ्यः प्रददे । हावीतप्पान्तर्गत-सिमरा-ग्रामे विशालं गभीरं च सरोवरमखानयत् । पितुः शक्रसिंहस्य निवासस्थानात् शक्रपुरी-(वर्तमान सकरीति) नाम्नाप्रसिद्धात् नातिदूरे नेहरा-नामकेग्रामे महाविशालमतिगभीरं तडागं खानयामास, यो हि साम्प्रतम् 'रजोरवरि' नाम्ना प्रसिद्धोऽस्ति । एतस्य महायज्ञे आमन्त्रितेषु विद्वत्सु चतुर्दशशतसंख्याका मीमांसकाः केवलं समुपस्थिता अभूवन् का कथा अन्येषां विपश्चिताम् । एतस्मिन् यज्ञसमये विदुषां समवाये मिथिलायां पञ्जीप्रबन्धः विधिवद् व्यवहारसरणिमागतः । पूर्वोक्तमहायज्ञः पञ्जीप्रबन्धश्च १३२६ ख्रीष्टाब्दे सम्पन्नोऽभवत् । एतत्समये हरिसिंहदेवो वयसो द्वात्रिंशे वसन्ते आसीदिति निम्नलिखितप्रमाणेन विज्ञायते—

शाके श्रीहरिसिंहदेवनृपतेर्भूपार्कतुल्ये[1] जनिः ।
तस्माद्दन्तमितेऽब्दके[2] बुधजनैः पञ्जीप्रबन्धः कृतः ॥[3]

---

१. १२१६ शकाब्दे-१२९४ ख्रीष्टाब्दे ।

२. ३२ द्वात्रिंशे वर्षे अर्थात् १३२६ ख्रीष्टाब्दे ।

३. मिथिला भाषामय इतिहास पृ.४९४ ।

महाराजहरिसिंहदेवस्य नेपालविजययात्राम्, विजयानन्तरं राज्ये विविधानि जनहितकार्याणि च चण्डेश्वरः कृत्यरत्नाकरे विस्तरेण कविकर्मकौशलेन समवर्णयत्।[१]

पञ्जीप्रबन्ध-निबन्धनस्य, तदनुसारं वैवाहिकसिद्धान्तस्य च निदान-सम्बन्धे एवमनुश्रूयते मधुबनी-मण्डलान्तर्गत-नेहरा-ग्रामस्य समीपे सत्कुलोत्पन्नः पं. हरिनाथशर्मा प्रतिवसति स्म। तस्य सत्कुलसम्भवा सुशीला सुन्दरी धर्मपत्नी आसीत्। एकदा पतिपरायणां तां गृहे एकाकिनीं विहाय हरिनाथो जीविकार्थं बहिर्जगाम। पत्युः सकुशलगृहागमन-कामनया सा प्रत्यहं नातिदूरस्थं श्रीभैरवनाथमर्चयितुं तन्मन्दिरं गच्छति स्म। तस्याः स्वरूपेण आकृष्टः एको नीचजातीयदुःसाध्यदुष्टः तामनुसरति स्म। "यदि केनाप्युपायेन इमां दुश्चरित्रां कलङ्किताञ्च कर्तुं प्रभवेयं तर्हि सत्कुलसम्भवेन तत्स्वामिना परित्यक्तेयमसहाया मां

---

१. तथाहि—

यद्यात्र चतुरिङ्गिणी-भरनमत् पातालपात-स्फुटद्-
भोगीन्द्राग्र्यशिरःफणामणिपतत् खण्ड-प्रदीपांशुभिः।
पाताले निपुणान्धकारपटली-निर्मोष-दृष्टप्रियाः
सत्कीर्तिक्षणलब्ध-लोचनफला गायन्ति भोगिस्त्रियः॥
उन्मूल्याद्रि-नितम्बामम्बरमणिं कृत्वा पताकावृतं-
सेनोद्धूतरजोभरैरनिभृतं भित्त्वा महाकर्दमम्।
दुर्गं सत्पथमातनोद् दृढमथो निर्माय दुर्गं पुन-
र्नेपालक्षितिपाल-वर्गमनयद् दुर्गं समन्तादयम्॥
आलीनं गिरिकन्दरासु विपिनेष्वन्तर्हितं निझरे
गम्भीरे चिरमग्नमद्रिशिखरप्राग्भारमाप्य स्थितम्।
नेपाले विजिते बलेन सुतरां भीतात्मभिर्भूमिपै-
र्विस्मृत्य द्युमणेः कुले भगवतः स्वं जन्म तत्तत्कृतम्॥
उत्खाते रथनेमि-चक्र-निवहैर्दन्तावलानां मदा—
सारैः सिक्ततमे महायतरणक्षेत्रे बल-क्षोदिते।
नाराचाहत-दाडिमोपम-पतत् कुम्भीन्द्र-कुम्भापतन्-
मुक्ताजालकमुप्तमस्यनुयशो बीजं विरेजे चिरम्॥

ग्रहीष्यती" ति दुर्भावनया स तस्याश्चारित्र्यमन्यथा प्रचारयति स्म। श्रीभैरवपूजार्थं गच्छन्तीमेनामनुव्रजन्तं तं दुष्टम् यदा कदा अवलोक्य पतिव्रताया अपि बान्धवास्तस्याश्चारित्र्ये शङ्कमाना बभूवुः। एतत्कलङ्कमूलकमनादरमसहमाना सा साध्वी हरिनाथपत्नी महाराज्ञ्या हरिसिंहदेवधर्मपत्न्याः शरणापन्ना बभूव। दिव्य[१]-परीक्षाद्वारा स्वपातिव्रत्यपरीक्षणं कारयितुञ्च प्रार्थयामास। महादेव्या अनुरोधेन महाराजहरिसिंहदेवः धर्मशास्त्रिणां पुरतः तस्या दिव्यपरीक्षां कर्तुं तस्या अञ्जलौ

एतेनातिवदान्यमौलिमणिना सम्मानितैरर्थिभि
र्दत्तानेक-मनोरथाधिकमहादानोदितैरुज्झितः।
भृङ्ग-श्रेणि-मसी-मलीमस-तनुच्छायश्च कल्पद्रुमः
प्रच्योतन्मकरन्द-बिन्दु-निवह-व्याजेन रोरुद्यते॥
एष मैथिलमहीभुजा भुजद्वन्द्ववारित-समस्त-वैरिणा।
श्रीविधायिनि कुलक्रमागते सन्धिविग्रहपदे नियोजितः॥
उन्मीलत् सहकार-सौरभ-मिलद् भृङ्गौघझङ्कारिणो-
विप्रेभ्यः सुरपत्तन-प्रणयिनोरम्भावन-श्यामलाः।
ग्रामाः सञ्चरदापगा-जलभरैरुन्निद्र-शालि-श्रिय-
स्ते दत्ताः कति न प्रसन्नमनसा मन्त्रीश्वरेणामुना॥
कुमुदवनेन्दु-शङ्ख-शकलाभजलं यतिनां-
मन इव तारकाम्बरसमं सिमरामपुरे।
पवन-जवोद्धुताम्बुजरजः परवासचयं
किरदिव दिङ्मुखे नव मचीखनदेषसरः॥
आदिग्धो जलधि स्त्वया चुलुकितः क्षारोदकेनेहिमा
मापातुं मधुरं घटोद्भवमुने यद्यस्ति शक्ति स्तव।
इत्युच्चैर्वदतीव वीचि तुलिताम्भोधि स्फुटाम्भो भरा-
रावैरुद्यतवाग्निरात्मनि हिताहङ्कारमेतत् सरः॥
एतत्कीर्तिं जिगीषुरीशमभजद्देवः सुधादीधितिः
प्रायः शेखरतामवाप न पुनस्तस्मादसौ तत्फलम्।
इत्येवं गलिते मनोरथ इवेभाङ्गच्छटा-सोदरम्
धत्ते निर्जितकान्तिरलमधिकं शङ्के कलङ्कं शशी॥ इत्यादि।

१. अञ्जलौ धृतानामष्टदलकमलाकाररूपाणामष्टानाम् अस्वत्थपत्राणां मध्ये एकमन्यमस्वत्थ पत्रं निधाय तत्र प्रतप्ताङ्गार लौहधारणरूपं सत्यपरीक्षणं दिव्य परीक्षा प्रथितासीत्।

तप्ताङ्गारलौहं दत्त्वा "नाहं चाण्डालगामिनी" ति व्याहर्तुं तां प्रत्यवोचत। तथाकृते तस्या हस्ते दाहः समजायत। सर्वे जनास्तां चाण्डालगामिनीमवगत्य तां जात्या बहिष्कृत्य ततः प्रचलिताः। ततःपरमधोवदना शोकाकुला सा पतिव्रता पतिदेवं ध्यायन्ती विह्वला सती सोरस्ताडं रुरोद। ततः पतिपरायणा सा कलङ्कपङ्कं प्रक्षालयितुकामा हरिनगर-ग्राम-निवासिनं नैयायिक-प्रवरं हरिनाथझानामानं स्व-स्वामिनः सुहृदं निकषा स्ववेदनावृत्तान्तमवर्णयत्। "कथमियं निर्दुष्टापि दिव्यपरीक्षायां दुष्टेत्युद्घोषिता" इति सुविचार्य नैयायिकः पुनर्दिव्यपरीक्षां विधातुं महाराजमनुरुरोध। "नाहं पतिव्यतिरिक्त-चाण्डालगामिनी"ति संकल्पवाक्यं व्याहर्तुमादिदेश। पुनः सर्वेषां समक्षं तथाकृते सति सा पतिपरायणा दिव्यपरीक्षायां समुत्तीर्णा सभ्यसमाजस्य साधुवादमादधाना प्रसन्ना बभूव। तावत् तस्याः पतिः हरिनाथोऽपि ग्राममाजगाम। जन-कोपारुणाभ्यां नयनाभ्यामवलोकितोहरिनाथः किंकर्तव्यविमूढ इवाभवत्। विज्ञैः सुविचार्य एतद्रहस्यमित्थं समुद्घाटितम्—

हरिनाथस्य विवाहः पितृपक्षे षष्ठपुरुषस्य कन्यया सह अज्ञानाद् अनधिकारे एव आसीत्, येन "मातृतः पञ्चमीं त्यक्त्वा पितृतः सप्तमीं भजेत्" इति धर्मशास्त्रीयवचनस्य समुल्लङ्घनात् "चाण्डालः स्वजनागामी चाण्डालः स्वजनासुतः।" इति वचनप्रामाण्येन स्वजनागामित्वात् हरिनाथश्चाण्डालतां प्राप्तः।

एतद्विषयकः प्रामाणिकश्लोकः पञ्जीप्रबन्धपुस्तकेषु एवं प्राप्यते—

"स्वा[१]जन्याक्षतपाणिपीडनवशाद् दैवापराधं विना
हा कष्टं हरिनाथशर्म-गृहिणी त्यक्ता विशुद्धापि सा।

दुष्टा[२]दुर्मतिना[३], मयैव मिथिला भूदेव-वंशावली-
व्याख्याकौशलपाणिनाऽथ विदधे तद्भञ्जिकापञ्जिका"[४]

---

१. स्वाजन्या इत्यत्र स्वार्थेष्यञ्, अतः स्वजना एव स्वाजन्या।

२. दोषात्मकवचसा अभिशप्ता।

३. दुर्मतिना दुर्जातिना दुःसाध्यजातिनेत्यर्थः।

४. मिथिला भाषामय इतिहास (पृ.५०५)

एतद्विषयकः अपरश्चापि श्लोकः पञ्जीप्रबन्ध-मूलपुस्तके एवमुपलभ्यते—

"गंगौरो नयनाथकस्य दुहिता तस्यां तु तारापते-

श्चोद्वाहो मटिहानिसंज्ञकद्विजस्तत्कन्यका वै पुनः।

गंगौरो हरिनाथकस्य गृहिणी कन्या तु सा पञ्चमी

यातेयं गणनावशाच्च स्वजना सम्बद्धचाण्डालिनी॥"[१]

एवं हि एतादृशो दोषो मा भवतु पुनरिति विचार्य महाराजो हरिसिंहदेवो मिथिलायां पञ्जीप्रबन्धं निर्माप्य[२] तदनुसारिणीं व्यवस्थां समचालयत्, या च तदारभ्य अत्र साधु प्रचलति।

महाराजहरिसिंहदेवस्य महामात्यः महामहत्तक चण्डेश्वरः यथैव पद-वाक्य-प्रमाण-पारावारीणः रत्नाकर-कार आसीत् तथैव रत्नादिसम्पदां दानेऽपि प्रवीण आसीत्। १३१४ खीष्टाब्दे अग्रहण-शुक्ले संक्रमणपुण्यकाले वाग्वतीनदीतटे स्वर्णमयस्य पुरुषस्य तुलामहादानमकार्षीद् इति सूचयति अधस्तनपद्येन विवाद-रत्नाकरो नाम ग्रन्थः—

श्रीचण्डेश्वरमन्त्रिणा मतिमतानेन प्रसन्नात्मना
नेपालावनि-भूमिपालजयिना धर्मेन्दुदुग्धाब्धिना

---

१. मिथिला तत्त्वविमर्श पृ. १३८। पञ्जीप्रबन्धलेखनशैल्यामेव श्लोकस्यास्य रचनाद् व्याकरणाशुद्धिर्मर्षणीया।

२. शाके श्रीहरिसिंहदेवनृपतेर्भूपार्कतुल्ये जनिः
तस्माद्दन्तमितेऽब्दके द्विजगणैः पञ्जीप्रबन्धः कृतः।
तस्माद्वै द्विज-बीजि-वंश-कलितं यद् विश्वचक्रे पुरा
तद्विप्राय समर्पितं सुकृतिने शान्ताय सर्वार्थिने॥
ब्राह्मणानां समुत्पत्तिं तद्वीजिकथनं तथा।
करोमि रघुदेवाख्यः पाण्डुः पञ्जीविनिश्चयम्॥ मिथिलातत्त्वविमर्श पृ. १३६।

वाग्वत्यास्सरितस्तटे सुरधुनी साम्यं दधत्याः शुचौ
मार्गे मासि शुभे पवित्रसमये दत्तस्तुलापूरुषः ॥

मिथिलां शासति हरिसिंहदेवे १३१६ खीष्टाब्दं यावद् दिल्लीश्वरः आसीत् खिलजी-वंशीय- जलालुद्दीनस्य भ्रातृजः अलाउद्दीनः । ततः परं तुगलकवंशोद्भवः गयासुद्दीनः १३२५ खीष्टाब्दं यावत् शासनमकरोत्। स चैकदा मिथिलाधिपं हरिसिंहदेवमभियोक्तुकामः महता बलेन सहाजगाम । किन्तु महाराजहरिसिंहदेवात् तस्मिन् युद्धे पराजितोऽभवत्। इमां घटनां वर्णयति कविशेखराचार्य-ज्योतिरीश्वरठक्कुरः स्वकीये "धूर्तसमागम" प्रहसने—

नानायोध-निरुद्ध-निर्जित-सुरत्राणस्य सद्वाहिनी

नृत्यद्भीम-कबन्ध-मेलक-दलद्भूमि-भ्रमद्भूधरः ।

अस्ति श्रीहरिसिंहदेवनृपतिः कर्णाटचूडामणिः

दृप्यत्पार्थिव-सार्थ-मौलि-मुकुट-न्यस्ताङ्घ्रिपङ्केरुहः ।"

एवं पराजितः सन् ग़यासुद्दीनः वङ्गाधिपेन लक्ष्मणसेनेन सह युयुधे। तं पराजित्य च तत्रत्यः शासको बभूव। एवञ्च महाप्रबलोऽयं पुनः १३२४/२६ खीष्टाब्दे आक्रमणं विधायहरिसिंहदेवं पराजित्य मिथिलां स्वशासनाधीनामकरोत् ।

परमपराक्रमशालिनोऽपि हरिसिंहदेवस्य पराजयः कथमभूदित्यस्य रहस्यात्मकमेकं कथानकमेवमनुश्रूयते— चण्डेश्वरस्य पिता वीरेश्वरो यदा महाराजशक्रसिंहस्य प्रधानामात्य आसीत्। एकदा दहिभत-ग्रामे परिभ्रमन् एकं स्पर्शमणिमवाप । तत्प्रसादात् लब्ध-विपुल-धनराशिः तत्रैव सागरमिव वीरसागरं खानयामास, अन्यानि च अनेकानि सुकृत्यानि विदधे । दिल्लीश्वरः अल्लाबुद्दीनः वृत्तान्तमिममाकर्ण्य तं स्पर्शमणिं नेतुं दूतविशेषं प्राहिणोत्। "मन्त्रादिना विधिवत् समभ्यर्चित एवायं मणिरभीष्टं प्रसूते, नान्यथा । सम्राडपि एतत्फलभागी भवेदेवेति" दूतद्वारा संवादं प्रेषयामास । तदनुसारं समये समये द्रव्यादिकमुपायनीचकार ।

तदनन्तरम् यदा मुहम्मदतुगलकजुन्नाखानः प्रशासको बभूव तदा स स्पर्शमणिं नेतुं पुनर्दूतं प्राहिणोत्।

ममान्तिम-समयः सन्निकटोऽस्ति। काशीं गत्वा तत्र दानपुण्यादिकं विधाय एवं मणिं दास्यामीति कथयित्वा तेनैव दूतेन सह काशीं प्राचलत्। नौकया काशीं गच्छन् वीरेश्वरः पाटलिपुत्रे तदानीं स्थितं युवानं हरिसिंहदेवं वृत्तान्तमिमं श्रावयामास। हरिसिंहदेवस्य मन्त्रणानुसारेण काशी-मणिकर्णिकायां दिनत्रयं यावद् दानपुण्यादिकं विधाय शरीरेण सह स्पर्शमणिमपि गभीरे गङ्गानीरे निमज्जयामास। दूतः सर्वमिममुदन्तं विशेषतः हरिसिंहदेवस्य गुप्तमन्त्रणां राज्ञे निवेदयामास। कोपाग्निखनिः जुन्नाखानः हरिसिंहदेवं कारागारीकर्तुमादिदेश।आदेशप्रापणात् पूर्वमेव गुप्तचरेणवृत्तान्तं विज्ञाय हरिसिंहदेवः राजपुरोहिताय गुरवे महात्मने सद्विप्राय सिद्धरूपाय ओइनवार-वंशतिलकाय कामेश्वरठक्कुराय प्राज्य-राज्यशासनपट्टं प्रदातुं समादिश्य स्वयं नेपालगिरिगह्वरं प्रविवेश।

शिलालेखादि-साक्ष्येण ज्ञायते यत् प्रतिशोधभावनोद्दीपितः चतुरङ्गबलान्वितः वङ्गाधिपतुरुष्क-गयासुद्दीनः मिथिलामभिषेययामास। ततः पराजितो हरिसिंहदेवः सिमरौनगढ-राजधानीं विहाय सपरिकरो नेपालं प्रविष्टः।

अमुष्यायं पराजयः स्पर्शमणिकारणेन यवनाक्रमणेन वाऽभवत् इति निश्चयाभावेऽपि हरिसिंहदेवः १२४८ शकाब्दे, १३२६ खीष्टाब्दे पौषशुक्ल-दशम्यां मङ्गलवासरे स्वस्थानात् प्रचलितः नेपालं प्रविष्ट इति प्रमाणयति निम्नश्लोकः—

वस्वब्धि-बाहु-शशि-(१२४८) सम्मितशाकवर्षे

पौषस्य शुक्ल-दशमी-क्षिति-सूनुवारे।

त्यक्त्वा सपट्टनपुरीं हरिसिंहदेवो-

दुर्दैवदेशितपथो गिरिमाविवेश॥[1]

---

१. मिथिला तत्त्वविमर्श पृ. १४३।

सिमरौनगढ़-राजधानीतः प्रचलितो हरिसिंहदेवः त्रिचतुरान् मासान् प्रच्छन्नतया हरिलाखी-समीपस्थम् (उमगांव इति प्रसिद्धम्) उमाग्राममध्युवास। तत्र समराङ्गण-विचरण-चतुरेण चण्डेश्वरेण कृतसमुचितसैन्यबलविधानेन समुत्साहितः प्राप्तबलप्रकर्षः हरिसिंहदेवः नेपालदेशं विजित्य प्रथममश्मक-नगरे वनेपारव्य-प्रदेशे पश्चाद् भक्तपुरे च राजधानीं व्यधात्।

हरिसिंहदेवस्य नेपाल-विजय-यात्रायाः तत्रत्यप्रशानस्य च चण्डेश्वरेण "कृत्यरत्नाकरे" यद् विस्तरेण वर्णनं कृतम् तत्पूर्वम् एकस्मिन् प्रसङ्गे समुपन्यस्तम्।[१]

मल्लकालीनैर्नेपालभूपालैर्लिखितेषु स्वकीयवंशावलीपुस्तकेषु उत्कीर्णेषु शिलालेखेषु च हरिसिंहदेवस्य नेपाल-विजयपूर्वकं तत्रत्यराज्य-शासनं सम्यग् वर्णितं समुपलभ्यते।

मान्धातासिंहः स्वकीये "गीतकेशव" महाकाव्ये प्रारम्भे वंशपरिचयप्रसङ्गे समुल्लिखति—

वाङ्गलैर्यवनैः क्रुधा विधिवशाद् राज्यं सद्रव्यं हृतम्
दुर्गं सीमर-नामकं च सहसा नेपालमभ्यागतः।
सोऽयं भूमिपतिश्चकार वसतिं भक्ताख्यपुर्यां रिपून्
हत्वा सम्प्रति शक्तिभक्तिसुदृढो राजाधिराजो महान्॥[२]

एवमेव प्रतापमल्लस्य शिलालेखः अमुं वृत्तान्तं पल्लवयति—

आसीच्छ्रीहरिसिंहदेवनृपतिर्दातावदाताशयः
श्रीकर्णाट-वसुन्धराधिप-महावंशोद्भवो भावुकः।
उन्मीलन्मिथिलापुरीं निरुपमां नीत्या प्रशासद् द्विषाम्
हन्ता शोभियशोऽपरामरसरित् स्रोतो विधायी गुणी॥

१. २० संख्याङ्कितायां पादटिप्पण्याम्।

२. गीत केशव, राष्ट्रियाभिलेखालय पाण्डुलिपि क्रमाङ्क तृ. ९८।

अन्तर्वल्लित-विद्युदम्बुदसमाः स्तम्बेरमा दुर्द्दमा-
दाहोत्तीर्ण-सुवर्ण-शृङ्खल-युता ग्रैवेयघण्टोद्यताः।
सोऽत्राधिष्ठितमैदिनी-परिबृढान् निर्धूय दिव्यास्पदं
तेनेभक्तपुराह्वयं च कलितं दृष्टैश्च पुष्टैर्जनैः॥[1]
जातः श्रीहरिसिंहदेवनृपतिः प्रौढप्रतापोद्यतः
तद्वंशे विमले महारिपुहरे गाम्भीर्यरत्नाकरः।
कर्ता यः सरसामुपेत्य मिथिलां संलक्ष्य लक्षप्रियो-
नेपाले पुनराढयवैभवयुते स्थैर्यं विधत्ते चिरम्॥[2]

ललितपुरपाटने सिद्धनरसिंहमल्लस्य शिवमन्दिरद्वारशिलालेखः तथ्यमिद-मेवं विशदयति—

संजातो हरिसिंहदेवनृपतिः प्रोद्यत्प्रतापोन्नतिः
वंशे चण्डरुचेरचिन्त्यमहिमा श्रीमैथिलक्ष्माहरिः।
ज्ञात्वा दुर्यवनात् कलेरिव निजे राज्ये स्वधर्मक्षतिं
नेपालावनिपीठमेत्य सुचिरं राज्यं चकार प्रभुः॥
प्रावीण्य-प्रथित-प्रताप-मथित-प्रत्यार्थि-पृथ्वीपति-
प्रोद्दाम-प्रमदौघ लोचन-पथः प्रारब्ध-वारांनिधिः।
जातः श्रीहरिसिंहदेव-नृपतिर्दातावदातान्वये
सम्प्राप्तः पृथुना परेण समतां यो वृत्तिदाता सताम्॥

१. काठमाण्डू तुलजा मन्दिरस्थप्रतापमल्लशिलालेखः।
२. पशुपतिप्राङ्गणस्थशिलालेखः।

एतेषु अकाट्यप्रमाणेषु सत्स्वपि यदि नाम केचन हरिसिंहदेवस्य नेपाले राज्यशासने संशेरते तर्हि दिनमपि तिमिरायमाणमवलोकयति उलूके मित्रस्य किं दूषणम् ।

एवं हि नेपालोपात्यकायां भक्तपुरे राजधानीं निर्माय हरिसिंहदेवराज्यं तत्र सुदृढं विधाय मन्त्रीन्द्रचूडामणिः चण्डेश्वरः पुनर्मिथिलायां जन्मभूमौ समागत्य कामेश्वर-ठक्कुरात्मजं राजानं भवेश्वरं समाश्रितः। एतस्यैव निदेशेन राजनीतिरत्नाकरं रचयामासेति पूर्वमुपन्यस्तम् ।

राज्याधिकार-शासनपट्टं विलिख्य राजगुरवे सिद्धपुरुषाय कामेश्वरठक्कु-राय दत्वा हरिसिंहदेवे मिथिलातो गते सति दिल्लीश्वरः मुहम्मदतुगलकजूनाखानः लेखानुसारं राज्यभारं कामेश्वरठक्कुराय दातुं विशिष्टाधिकारिद्वारा शासनादेशं प्रेषयामास । महापुरुषेण कामेश्वरेण अस्वीकृतो राज्यभारः तज्जयेष्ठपुत्रेण भोगी-श्वरेण गृहीतः । राज्यशासनं ग्रहीतुम् फिरोजशाहसुरतानः 'प्रियसखे,ति भणित्वा ससम्मानं भोगीश्वरं निवेदयामासेति समुल्लिखति "कीर्तिलतायां" विद्यापतिः । तदारभ्य मिथिलाराज्यम् ओइनवार-वंशे समागतम् । किन्तु १३२६ खीष्टाब्दात् हरिसिंहदेवस्य गमनसमयात् परम् १३४० खीष्टाब्दं यावत् मिथिलायां वस्तुस्थित्या राज्यशासनं नाममात्रमासीत् । ततः परमपि महाराजशिवसिंहस्य राज्यारोहणात्पूर्वम् १४०२ खीष्टाब्दं यावत् दिल्लीशासनाधीनं करदं राज्यमासीत् । अमीषु वर्षेषु पारस्परिकविद्वेषात्, अन्योन्यसंघर्षात्, पारिवारिककलहात्, राज्यस्यानेकत्र विभाज-नात्, प्रजानुरञ्जनाभावाच्च सर्वत्र अराजकतास्थितिरासीत् ।

१३२६ खीष्टाब्दे ओइनवार-जगतपुरमूलकः भोगीश्वरो मिथिलायां प्रथमोऽग्रजन्मा राजा बभूव । स च कनीयांसं सोदरं कुसुमेश्वरं महत्तकपदे न्ययु-ज्यत । किन्तु तृतीयोऽनुजो भवेश्वरो बलाद् राज्यस्य विभाजनं विधाय अर्द्धराज्य-मगृह्णात् । चतुर्थानुजस्तु बाल्ये वयसि परलोकं जगाम । पितुरनुरोधेन भोगीश्वरः पितृव्याय हर्षणठक्कुराय राजनगर-समीपस्थसुगाना-ग्राममदात् । मिथिलाया दक्षिणभागे ओइनी-ग्रामे स्वराजधानीं निर्माय स ततः १३६० खीष्टाब्दं यावत् अर्द्धराज्यं प्राशासत् ।

भवेश्वरः अर्द्धराज्याधिकारी भूत्वा मिथिलाया उत्तरे भागे भवाम-ग्रामे स्वराजधानीं निर्माय १३७० खीष्टाब्दं यावत् शासनमकरोत्।

१३६० खीष्टाब्दे भोगीश्वरे दिवंगते तस्यात्मजः गणेश्वरः पितृराज्याधिकारी बभूव। किन्तु वर्षाभ्यन्तरे एव असलान-नामकेन एकेन तुरुष्केन मिथिलां विजेतुमागतेन गणेश्वरः छलेन व्यापादितः। एतस्मिन् दुष्कर्मणि भवेश्वरसिंहपौत्रस्य त्रिपुरसिंहपुत्रस्य अर्जुनसिंहस्यापि सहयोग आसीद्येन अर्जुनसिंहः "राज्य दुर्जन"-"राज्यदुर्जन खाडे" इत्यादिकुत्सितोपाधिना पञ्जीप्रबन्धपुस्तके निर्दिष्टोऽभवत्। तदनन्तरं भवेश्वरः सम्पूर्णमिथिलाराज्यस्याधिकारी बभूव।

ततः परं वर्षाभ्यन्तरे एव गणेश्वरसिंहस्य द्वितीयस्तनूजः कीर्तिसिंहः स्वपितृराज्यार्थं पितामह-भ्रातरं-राजानं भवेश्वरं प्रार्थयामास। किंन्तु त्रिपुरार्जुनादीनां विरोधेन भवेश्वरः तस्मै राज्यार्द्धं दातुं स्वकीयमसामर्थ्यं प्रकटयामास। एतेनोत्तेजितः कीर्तिसिंहः दिल्लीश्वरं फिरोजशाहं निवेद्य तत्सैनिकसाहाय्येन त्रिपुरार्जुनादिकं निहत्य प्रतिपक्षं च विजित्य अर्द्धराज्यमर्जयामास। संग्रामेऽस्मिन् अर्जुनस्य व्यापादने द्रोणवार-महीपतेः पुरादित्यस्यापि विशेषसहयोग आसीदिति वर्णयति महाकवि- र्विद्यापतिः "लिखनावली" नामके स्वकीये ग्रन्थे—

जित्वा शत्रुकुलन्तदीय-वसुभिर्येनार्थिनस्तर्पिताः
दोर्दण्डार्जितसप्तरी-जनपदे राज्यस्थितिः कारिता।
संग्रामेऽर्जुनभूपतिर्विनिहतो बन्धौ नृशंसायित-
स्तेनेयं लिखनावली नृपपुरादित्येन निर्मापिता॥[1]

कीर्तिसिंहस्य प्रशस्तिपरायां "कीर्तिलतायाम्" विद्यापतिः एतदीयां कीर्तिगाथां विशदं पल्लवयाञ्चकार—

---

१. लिखनावली ग्रन्थान्ते।

कीर्तिसिंहस्य प्रशस्तिपरायां "कीर्तिलतायाम्" विद्यापतिः एतदीयां कीर्ति- गाथां विशदं पल्लवयाञ्चकार—

भासमस्तक-निवास-पेसला भूति-भाव-रमणीय-भूषणा।

कीर्तिसिंह-नवकीर्तिकामिनी यामिनी-पति-कलां जिगीषति ॥[१]

एतस्मिन्नेव समये दिघवय-मूलकः मैथिलमहाकविर्दामोदरमिश्रो बभूव यो हि स्वकीये "वाणीभूषणे" कीर्तिसिंह-प्रशस्तौ वर्णयति—

त्वयि चलति चलति वसुधा

वसुधाधिपकीर्तिसिंहधरणी-रमणे[२]

एतत्कालिक एव आसीत् कर्महासोन-करियाम-मूलकः वंशीधरवंशजः महाधूर्तराजः प्रसिद्धगोनूझा, यस्य विविधा रोचककथा मिथिलायामद्यापि गृहे गृहे हास्य-विनोदाय कथ्यन्ते।

राजनि कीर्तिसिंहे तदग्रजे वीरसिंहे च अनपत्ये एवाल्पे वयसि दिवंगते पुनर्भवेश्वरसिंहः सम्पूर्णमिथिलाराज्याधिकारी बभूव। दीर्घकालं राज्यसुखमनुभूय भवसिंहः हासिनी हंसिनी-तिनामिकाभ्यां पत्नीभ्यां सह वाग्वत्याः सरितस्तटे नश्वर-शरीरं विहाय सायुज्यमवाप। विद्यापतिः "पुरुषपरीक्षायाम्" विषयमिममेवं विशदयति—

भुक्त्वा राज्यसुखं विजित्य हरितो हत्वा रिपून् संगरे,

हुत्वा चैव हुताशनं मखविधौ भृत्वा धनैरर्थिनः।

वाग्वत्यां भवसिंहदेवनृपतिस्त्यक्त्वा शिवाग्रे वपुः,

पूतो यस्य[३] **पितामहः स्वरगमद्दारद्वयालंकृतः ॥**

---

१. कीर्तिलता प्रारम्भे

२. मिथिलातत्त्वविमर्श पृ. १५०

३. शिवसिंहस्येत्यर्थः।

अतः परं भवेश्वरसिंह-तनूजन्मा गरुडनारायणपदाङ्कितदेवसिंहः १३७० ख्रीष्टाब्दे राज्यसिंहासनमारुरोह। अयं हि ओइनी ग्रामं विहाय दरभंगा-नगराद् दक्षिणभागेऽनतिदूरे (देकुली) देवकुलीग्रामे राजधानीं निर्ममे। एतस्मिन् समये तस्यतनूजः शिवसिंहः प्रायः अष्टादशवर्षीयः यौवनसोपानमारूढः महान् तेजस्वी, भुजबलशाली पराक्रमी, राजनीतिनिपुणः प्रथितयशा अभवत्। विद्यापतिश्च विंशतिवर्षीयः तत्समवयस्क एवासीत्। असौ न केवलं शिवसिंहस्य बालसखा अपि तु राज-कार्य-संचालने प्रमुखपरामर्शदाताप्यासीत्। वस्तुतस्तु विद्यापतिः शिवसिंहस्य कृते-आसीत्—

सचिवः प्रियकृत् सखा सुहृत् समवयसा च कलादि-बोधकः।

सुखदुःखसमानतां दधन्नय-विनयादि-विधान-दर्शकः॥

महाराजभवसिंहस्य राज्यकाले एव महामहत्तकचण्डेश्वरः तस्य महामन्त्री बभूव। ततः परं धीरेश्वरस्य तनयः जयदत्तठक्कुरः जयदत्तस्यात्मजः गणपतिठक्कुरश्च ओइनवार-वंशीय-राजानाम् प्रधानाधिकारिपदेषु कार्यरता आसन्। गणपति ठक्कुरात्मजः विद्यापतिः अलौकिकप्रतिभासम्पन्नः नयविनयादि-विशिष्ट गुणगणालङ्कृतः बाल्यादेव स्वजनकेन सह विभिन्नराजद्वारेषु आगच्छति स्म। एतस्य अलौकिकप्रतिभया कीर्तिसिंहः अर्जुनसिंहः देवसिंहश्च विशेषत आकृष्टा बभूवुः। अतोऽयमेतेषां समेषां प्रियपात्रमासीत्। एतेषु पारस्परिकविग्रहं जानानोऽपि असौ अन्योन्यविरोधमपाकर्तुं मिथिलायाश्च साम्राज्यं विवर्धयितुं तदर्थं परस्परसामञ्जस्यं विधातुं पूर्णतः प्रयतमान आसीत्। अत एव परस्पर-विरोधिनामपि त्रयाणां राज्ञां सदस्सु अयं गच्छन्नासीत्। पश्चाद् देवसिंहस्य एकच्छत्रराज्ये संजाते तस्यैव सदसः प्रधानपुरुषः विद्यापतेः पिता गणपतिठक्कुरो बभूव तथा विद्यापतिरपि एतस्यैव राजद्वारस्य आत्मीयः समजायत। अत एव शिवसिंहेन सह अस्याधिकं सख्यमभूत्।

देवसिंहे राज्यारोहणं कुर्वत्येव शिवसिंहो युवराजो बभूव। "गरुडनारायण" महाराजदेवसिंहः स्वभावान्नारायणपरायणः राज्यहेतुक-बन्धु-विरोधस्य दुष्परिणामं

विलोकयन् विरक्त इवासीत् । अतो वस्तुतो राज्य-शासन-संचालनं शिवसिंह एव कुर्वन्नासीत् । अत एव जीवत्येव महाराजे देवसिंहे अयं वस्तुस्थित्या महाराजो बभूव ।

नवयौवने यौवराज्यमवाप्य शिवसिंहदेवः सम्प्राप्त-विद्यापति-बुद्धिकौशलः दिल्ली प्रशासनेन करदीकृते तातपादे जीवत्येव दिल्लीश्वरस्य वशंवदतामसहमानः करदानमस्वीचकार । एतेन पादाहतफणीन्द्र इव फूत्कारं विदधानो दिल्लीश्वरः सेनापत्यधिष्ठितान् विपुलसैनिकान् मिथिलाधिपतिं वशीकर्तुं प्रेषयामास । एतस्मिन् संग्रामे स्वल्पेनापि सैनिकबलेन सह स्वपराक्रमबलेन शिवसिंहः अनेकान् दिवसान् तुरुष्कबलमवरुरोध । एकदा तुरुष्कसेनापतिसनाथा तद्वाहिनी परितः संवेष्ट्य बाहुभ्यां शिवसिंह तथा परिषष्वजे येन सिंहः पिञ्जरीभूतः सन् बलाद् दिल्लीं सेनापतिना आनीतः कारागारीकृतश्च ।

चरमावस्थापन्नो जर्जरीभूतशरीरो देवसिंहः प्राणप्रियस्य तनयस्य कारागार-व्यथया व्याकुलोऽभवत् । विद्यापतिस्तु प्रियसख-विरहमसहमानः स्वकलाकौश-लेन तं बन्धनान्मोक्तुं सत्वरमेव दिल्लीं प्रतस्थे ।

तत्र दिल्लीश्वर-सुरतानस्य पुरतः स्वपरिचय-प्रसङ्गे "अहं क्रान्तदर्शी कविरस्मि । अप्रत्यक्षमपि वस्तु प्रत्यक्षमिव वर्णयितुं शक्नोमीति निवेदयाञ्चकार । कौतुकेन समुत्सुकतया च कविं परीक्षितुकामः सुरतानः सद्यःस्नातां कमनीयां कामिनीं वर्णयितुमादिदेश ।

महाकविः सद्यो विरचितां मिथिलाभाषामयीमधस्तनकवितां श्रावयामास—

"कामिनि करए सनाने ।

हेरितहि हृदय हनए पचबाने ॥ १ ॥

चिकुर गरए जलधारा ।

जनि मुखससि डर रोअए अँधारा ॥ २ ॥

कुचयुग चारु चकेवा।
निअ कुल मिलिअ आनि कोन देवा॥ ३॥
ते संका भुजपासे।
बांधि धएल उड़िजाएत अकासे॥ ४॥
तितल वसन तन लागे।
मुनिहुक मानस मन्मथ जागे॥ ५॥
भनइ विद्यापति गावे।
गुनमति धनि पुनमतजन पावे॥ ६॥

मैथिली भाषानभिज्ञानां सुखबोधाय डा. काशीनाथमिश्रेण संस्कृते अनूदितामिमां कवितामिह उद्धरामि—

परिशीलयति स्नानं तरुणी कामेषु तापसन्तप्ता।
प्रहरति कामो बाणैर्मनांसि तां पश्यतां गाढम्॥ १॥
विगलति वारि-प्रसरश्चिकुरेभ्यो मदिरनयनायाः।
मुखचन्द्रच्छविभीतो रोदिति मन्ये तमोभारः॥ २॥
पीनघनस्तनयुगलं कोकद्वन्द्वं मनोहरं नितराम्।
कः खलु देवो येन स्वकुले निहितं सहैव तद्द्वन्द्वम्॥ ३॥
कोकयुगं मा यातु व्योमतलं खल्वितः समुड्डीय।
इत्थं शङ्कितचित्ता कृत-हस्तस्वस्तिकातन्वी॥ ४॥
सद्यःस्नाता तरुणी दधती वसनं शरीरसंसक्तम्।
कामं जनयति कामं मनसि मुनीनामपि प्रभवम्॥ ५॥

विद्यापतिः कवीशः कथयति पुण्येन लभ्यते महता।

गुणवद्भिरीदृशी खलु गुणगणा रुचिराङ्गना नियतम्[१] ॥ ६ ॥

सुरतानः एतावता परितुष्टिं न लेभे । स एकस्याम् दारु-निर्मित-बृहन्मञ्जूषायां कविवरं विधाय रज्जु-साहाय्येन मञ्जूषां कूपमध्येऽवतार्य उपरि उपकूपम् एकामनवद्यसुन्दरीं मुखानिलेन सरसेन्धन-धूमायित-पावकं धमन्तीं भामिनीं वर्णयितुं कविमादिदेश । तामनवलोकयन्नपि क्रान्तदर्शी महाकविरेवमवर्णयत्—

सजनि निहुरि फुकु आगि।

तोहर कमल भमर मोर देखन मदन उठल जागि॥ १ ॥

जौं तोहे भामिनि भवन जएबह

अएबह कौने बेला।

जौं एहि संकट सौं जिव बांचत

होएतलोचन मेला॥ २ ॥"

मिश्रमहोदयेन कृतमेतद्गीतस्य संस्कृतरूपान्तरमवलोक्यताम्—

सुन्दरि! नतशिरसा त्वं

ज्वालय वह्निं मुखानिलोच्छ्वासात्।

तव कमलं मधुमधुरं—

दृष्टं मच्चित्त-भृङ्गेन॥

सौरभ-सम्भृतमनुपम्-

रूपं कमलं त्वदीयमालोक्य।

---

१. विद्यापतिशतकम्, भूमिका पृ.XVIII

सुप्तो मनसि मदीये
जागरितः साम्प्रतं मदनः ॥
त्वं यदि यास्यसि भवनं
भामिनि! भूयः कदा त्वमागन्ता।
जाते सङ्कट-मोक्षे
नूनं द्वक्संगमो भावी ॥[१]

विद्यापतेरेतद्वर्णनेन चमत्कृतो दिल्लीश्वरस्तदभिलषितां शिवसिंहस्य कारागारान्मुक्तिमादिश्य महाकविं पुरश्चकार। प्रमोदमानमानसो महाकविः प्रियवयस्येन शिवसिंहेन सह मिथिलामाजगाम। महाराजदेवसिंहः प्रेयांसं सुतवरं शिरसि आघ्राय शुभाशीर्वचोभिश्चुचुम्ब। राज्ये सर्वत्र प्रहर्ष-प्रवाहः प्रासरत्। रससिद्ध- कवीश्वरो विद्यापतिः जरामरणज-भय-रहितां जगति प्रसृत्वरीं शरच्चन्द्र-मरीचिधवलां कीर्तिमलभत।

महाराजदेवसिंहः २९३ लक्ष्मणाब्दे १३२४ शकाब्दे १४०२ खीष्टाब्दे चैत्रकृष्णषष्ठ्यां गुरौ वयसा नवतितमे वर्षे गङ्गातटे नश्वरं शरीरं विहाय दिवं ययौ।

पितृ-कर्मणि व्यापृते एव शिवसिंहदेवे जौनपुरस्थतुरुष्क-"शूलतानः" महता संरम्भेण मिथिलामभ्यषेणयत्। उत्तरीयं दधान एव मिथिलाधराधीश्वरः शिवसिंहः सबलेन निजबलेन महाघोरे तस्मिन् संग्रामे प्रतिपक्षसैनिकबलं विद्रावयामास। सिंहात् शृगाल इव शत्रुसैनिकः पुच्छं संकुच्य पलायामास। महाराजशिवसिंहः एकस्मिन्नेव समये यमराज-यवनराजाभ्यां सह संयुध्य गङ्गालाभदानेन पितरममरपुरं सम्प्रेष्य यमराजं पराजयत तथा संग्रामे शत्रुबल-सम्मर्द्दनेन यवनराजं व्यजयत। महाकविविद्यापतिरिमां घटनां कीर्तिपताकायां विशदं पल्लवयामास। ग्रन्थान्ते विषयमुपसंहरन् वर्णयति—

---

१. तत्रैव पृ.XIX

एवं श्रीशिवसिंहदेवनृपतेः संग्रामजातं यशो
गायन्ति प्रतिपत्तनं प्रतिदिशं प्रत्यङ्गणां सुभ्रुवः।
एतत्कीर्तिपताकिका सुविदिता वाणी च विद्यापते-
राचन्द्रार्कमियं विराजतु मुखाम्भोजेषु भूयः सताम्[1] ॥

महाराजे देवसिंहे दिवंगते तस्मिन्नेव वर्षे १४०२ खीष्टाब्दे शिवसिंहो राज्यसिंहासनारूढो महाराजाधिराजो बभूव। रूपनारायणेति सर्वानुमत विशिष्टपदवीं च प्राप। पितूराजधानी-देवकूलीतः दरभंगा-वाग्वतीसमीपे गजरथपुरे स्वराजधानीं निर्ममे। नव-मासाधिकवर्षत्रयमात्रं यावद् राज्यं प्रशासत् अनेकं विपुलं वारिराशिं सरोवरं खानयामास। कल्पान्तस्थायियशोवर्धकमनेकविधं प्रजानुरञ्जकं कार्यं राजधान्यां मिथिलायां विदधे।

राज्यारोहणात्परं चतुर्थे मासि महाराजाधिराजः शिवसिंहदेवः अभिनवजयदेवोपाधिधारिणे परमसखाय विद्यापतये विसपीग्रामं समर्पयत्, यस्याधस्तनं शासनताम्रपत्रमद्याप्युपलभ्यते—

"स्वस्ति गजरथेत्यादि-समस्त-प्रक्रिया-विराजमानश्रीमद्रामेश्वरी-लब्ध-प्रसाद-भवानी-भव-भक्ति-भावनापरायण-रूपनारायण-महराजाधिराज-श्रीमच्छि -वसिंहदेवपादाः समर-विजयिनो जरैलतप्पायां बिसफी-ग्रामवास्तव्य-सकललोकान् भूकर्षकांश्च समाज्ञापयन्ति। विदितमस्तु भवताम्। ग्रामोऽयमस्माभिः सप्रक्रियाभिनवजयदेव-महाराज-पण्डितठक्कुर-श्रीविद्यापतिभ्यः शासनीकृत्य प्रदत्तोऽतो यूयमेतेषां वचनकरीभूय कर्षणादिकं कर्म करिष्यथ। ल. सं. २९३ श्रावण शुदि सप्तम्यां गुरौ।"

श्लोकास्तु

अब्दे लक्ष्मणसेन भूपतिमिते वह्नि-ग्रह-द्व्यङ्किते
मासि-श्रावणसंज्ञके मुनितिथौ पक्षे वलक्षे गुरौ।

---

१. कीर्तिपताका-चतुर्थविलासान्ते।

वाग्वत्याः सरितस्तटे गजरथेत्याख्या प्रसिद्धे पुरे
दित्सोत्साहविवृद्धबाहुपुलकः सभ्याय मध्ये सभम्॥ १॥
प्रज्ञावान् प्रचुरोर्वरं पृथुतरा भोगं नदीमातृकं
सारण्यं ससरोवरञ्च बिसपीनामानमासीमतः।
श्रीविद्यापतिशर्मणे सुकवये वाणीरसास्वादविद्
वीरः श्रीशिवसिंहदेवनृपतिर्ग्रामन्ददे शासनम्॥ २॥
येन साहसमयेन शास्त्रिणा तुङ्गवाहवर-पृष्ठवर्तिना।
अश्व-पत्ति-बलयोर्बलं जितं गज्जनाधिपतिगौडभूभुजाम्॥ ३॥
रौप्यकुम्भ इव कज्जलरेखा
श्वेतपद्म इव शैवल-वल्ली।
यस्य कीर्तिचयकेतककान्त्या
म्लानिमेति विजितो हरिणाङ्कः॥ ४॥
द्विषन्नृपति-वाहिनी रुधिर-वाहिनी-कोटिभिः
प्रताप-तरु-वृद्धये समर-मेदिनीप्लाविता।
समस्तहरिदङ्गना-चिकुर-पाश-वासक्षमं-
सितप्रसरपाण्डुरं जयति येन लब्धं यशः॥ ५॥
मतङ्गज-रथप्रदः कनक-दान-कल्पद्रुम-
स्तुतापुरुषमद्भुतं निजधनैः पिता दापितः
अखानि च महात्मना जगति येन भूमीभुजा
परापर-पयोनिधि-प्रथम-मैत्र-पात्रं सरः॥ ६॥

नरपति-कुल-मान्यः कर्णशिक्षावदान्यः
परिचित-परमार्थोदानतुष्टार्थि-सार्थः ।
निजचरित-पवित्रो देवसिंहस्य पुत्रः
स जयति शिवसिंहो वैरि-नागेन्द्र-सिंहः ॥ ७ ॥

ग्रामे गृह्णन्त्यमुष्मिन् किमपि नृपतयो हिन्दवो ये तुरुष्का-
गोकोलश्वात्ममांसैः सहितमनुदिनं भुञ्जते ते स्वधर्मम् ।
ये चैतद्ग्रामरत्नं नृपकर-रहितं पालयन्ति प्रतापै-
स्तेषां सत्कीर्तिगाथा दिशि दिशि सुचिरं गीयतां वन्दिवृन्दैः ॥८ ॥

महाराजाधिराजरूपनारायणशिवसिंहस्य सहधर्मचारिणी शुभलक्षणलक्षिता रूपलक्ष्मीरिव महाराज्ञी लक्ष्मणा (लखिमा) देवी परमविदुषी उच्चकोटिकवयित्री चासीत् । एतया गुम्फितानि कतिचन पद्यानि अद्यापि उपलभ्यन्ते यैरस्याः कविकर्म कौशलमनुमातुं शक्यते । एकया जलघटवाहिन्या सह एकस्यपथिकस्य पारस्परिक संभाषणं चित्रयन्त्या अस्या रुचिरपद्यविधानमवलोक्यताम्—

किं मां हि पश्यसि घटेन कटिस्थितेन
वक्रेण चारुपरिमीलितलोचनेन ।
अन्यं हि पश्य पुरुषं तव कार्ययोग्यं
नाहं घटाङ्कितकटीं प्रमदां स्पृशामि ॥

सत्यं ब्रवीमि मकरध्वजबाणमुग्ध !
नाहं त्वदर्थमनसा परिचिन्तयामि ।
दासोऽद्य मे विघटितस्तव तुल्यरूपः
स त्वं भवेन्नहि भवेदिति मे वितर्कः ॥

चक्रवाकदम्पत्या विरहवर्णनमाधुर्यमनुभूयताम्—

उत्कूजति श्वसिति मुह्यति याति तीरं
तीरात्तरुं तरुवरात् पुनरेति वापीम्।
वाप्यां न रज्यति न चात्ति मृणालखण्डं
चक्रः क्षपासु विरहे खलु चक्रवाक्याः ॥

अन्यच्च—

भङ्क्त्वा भोक्तुं न भुङ्क्ते कुटिलबिसलताकोटिमिन्दोर्वितर्का-
त्ताराकारास्तृषार्त्तः पिबति न पयसां विप्रुषः पत्रसंस्थाः।
छायामम्भोरुहाणामलिकुलशबलां वीक्ष्य सन्ध्यामसन्ध्यां
कान्ताविश्लेषभीरुर्दिनमपि रजनीं मन्यते चक्रवाकः ॥

नवपरिणीतां वधूं विहाय देशान्तरं गतस्य प्रियस्य विरहे नवोढाया वेदनां वेदयितुं रचितमिदं पद्यमस्या न केवलं कविकर्मचमत्कारमपि तु ज्योतिषशास्त्र-नैपुण्यमपि प्रदर्शयति—

सन्तप्ता दशमध्वजस्य गतिना संमूर्च्छिता निर्जले
तूर्यद्वादशवद् द्वितीयमतिमन्नेकादशामस्तनी।
सा षष्ठी कटि पञ्चमी नवभ्रुवा सा सप्तमी वर्जिता
प्राप्नोत्यष्टमवेदनां प्रथम हे तूर्णं तृतीयो भव॥[1]

लक्ष्मणादेव्या एतान्येव उदाहृतानि पद्यानि अस्या रसिकतां काव्यमर्मज्ञताञ्च प्रकाशयन्ति।

---

१. अस्मिन् श्लोके प्रथमद्वितीयादिशब्दाः क्रमशः मेष-वृषादिराशीन् बोधयन्ति। अतस्तत्तद्राशे र्नाम्ना अर्थः संगमनीयः

अस्मिन्नेव स्वर्णयुगे महाकवेर्विद्यापतेः मिथिलाभाषामयी सरसकोमलकान्त-पदावली सुधाधारामिव मधुधारां प्रवाहयन्ती काव्यधारा न केवलं राज-प्रासादमपि तु समस्तं जनमानसं रसमयं व्यधात्। शिवसिंहव्याजेन माधवं लखिमा-व्याजेन राधाञ्च वर्णयन्ती दिग्दिगन्तख्यातिमती कोकिलरवानुकारिसरसस्वरेण मधुर-रागेण रसिकान् मोहयन्ती पदावलीयमद्यापि जनकण्ठेषु विराजतेतराम्। कवेः 'कण्ठहारे-त्युपाधेरपि इदमेव निदानमिति आमनन्ति मनीषिणः।

विद्यापतेः कविताया रसनिर्झरिणी लखिमा-देवी-शिवसिंहदेवयोः सरस-जीवनकालपर्यन्तम् १४०६ खीष्टाब्दं यावन्निष्यन्दमानासीत्। विभिन्नराग-रागिणीनिबद्धां सुमधुरामेतदीयां कवितां रागानुसारं गातुं महाराजः कायस्थकुलभूषणं जयत-नामानं गायनं[१] न्ययुज्यत यो हि अन्तः पुरे राजपरिवारे महाकविसमक्षं सरागं गीतं गायति स्म। लोचनकविना विरचिता "रागतरङ्गिणी" विषयमिदमित्थं प्रमाणयति—

सुमतिसुतोदयजन्मा जयतः शिवसिंहदेवेन।

पण्डितवर-कविशेखर-विद्यापतये तु सन्न्यस्तः॥

अन्तर्हिते शिवसिंहदेवे तु महाकवेः कविता भक्ति-शान्तरस-निष्यन्दिनी मन्दाकिनीव प्रवाहिताभवत्। या हि मिथिलामाप्लावयन्ती न केवलं वङ्गकलिङ्गका-मरूप-नेपालावनि-रसिकजनान् अपि तु महाप्रभुचैतन्यदेव-शङ्करदेव- माधवदेवप्र-भृतीन् भक्तशिरोमणीनपि भक्तिरस-प्रवाह-निमग्नानकरोत्।

एवं गच्छति काले दृप्यद्दर्प-प्रतापोत्साहबलेन तुरुष्कशासनाधीनत्वमसहमा-नेन महाराजशिवसिंहदेवेन अनेकेषु संग्रामेषु प्रतिपक्षि-सैनिका रणाङ्गणात् पराङ्मु-खीकृताः।

पादाहतं सदुत्थाय रजोनिकरमपि मूर्द्धानमधिरोहतीति दृष्टान्तेन समुत्साहित-प्रबल-चतुरङ्ग सैनिकबल-सन्नद्ध-तुरुष्क-नासिरुद्दीन महमूद शाहः १४०६ खीष्टाब्दे

---

१. गायतेः कर्तरि ण्युट्. पा.सू. ३/१/१४७।

मिथिलां समाचस्कन्द । अस्मिन्नवसरे विपरीतपरिस्थितिमवलोक्य शिवसिंहदेवः विद्यापतिना सह संमन्त्र्य लखिमादेवीम् अन्यांश्च परिवारसदस्यान् राजवनौली-ग्राममधिवसतो द्रोणवार-महीपतेः पुरादित्यस्य मित्रस्य सविधौ संप्रेष्य स्वयं सैनिकबलेन युद्धाय सन्नद्धोऽभवत् । यथाशक्ति युयुधानोऽपि दुष्परिणाममवेक्ष-माणः स्वयं नेपालगिरिगुहामधिशिश्रिये ।

बहुशो गवेषणात् परमपि विलुप्तदर्शनस्य शिवसिंहस्य कामपि सूचना-मनवाप्य महाराज्ञी लक्ष्मणादेवी दिल्लीश्वरस्यानुज्ञया पतिं प्रतीक्षमाणा द्वादश वर्षाणि यावत् पतिदेवानुजस्य पद्मसिंहस्य सहयोगेन कथं कथमपि राज्यशासना-भिमुखी बभूव । द्वादशवर्षान्तेऽपि अनधिगतसूचनस्य पतिदेवस्य पर्ण-नर-दाहपु-रस्सरं प्रायोपवेशविधिना अन्त्येष्टिक्रियां समाप्य स्वयं परलोकं जगाम। भ्रातुर्निधनेन परमशोकाकुलः पद्मसिंहः कथमपि वर्षद्वयं राज्यशासनं विधाय अग्रजं शिवसिंहमेवानुससार ।

ततः पद्मसिंहस्य राज्ञी विश्वासदेवी प्रजाजनविश्वासमापन्ना दिल्लीश्वरेण आश्वस्ता १४२० खीष्टाब्दे राज्यसिंहासनासीना सती परमसाहसेन १४३२ खीष्टाब्दं यावत् मिथिलामशासत् । अनपत्यायाममरपुरगतायामस्याम् भवसिंहस्य पौत्रः हरसिंहस्य पुत्रो दर्पनारायणो नरसिंहः राज्याधिकारी बभूव । अयं हि १४३२ खीष्टाब्दात् १४५० खीष्टाब्दं यावत् मिथिलायां शासनं व्यधात् । अस्यैव वदान्यस्य भूपतेः धर्मपत्नी परमविदुषी धीरमती आसीत् ।

महाराजनरसिंहदेवे जीवत्येव तत्तनयः हृदयनारायणधीरसिंहः महाराजपदवी-मवाप । किन्तु १४५० खीष्टाब्दे पितरि परलोकंगते विधिवद् राज्यसिंहासनमारु-रोह । ऐहलौकिकसुखात् पारलौकिकमेव सुखं श्रेयस्करं मन्यमानो धीरसिंहः १४५२ खीष्टाब्दे एव परलोकमध्युवास ।

ततो नरसिंहद्वितीयस्तनुजन्मा भैरवसिंहो मिथिलामहीशासकोऽभवत् । ततः परमपि एतद्वंशजाः कतिचन राजानः मिथिलायां शासनं विदधिरे ।

महाराजकीर्तिसिंहादारभ्य महाराजभैरवसिंहं यावत् देवसिंह-कीर्तिसिंह-शिवसिंह-लक्ष्मणादेवी पद्मसिंह-विश्वासदेवी-नरसिंह-धीरसिंह-भैरवसिंहपर्यन्तानां महाराजानां राज्यकाले महाकविर्विद्यापतिः राज्याश्रितः सन् विविधान् ग्रन्थान् विरचयाञ्चकारेति हेतोरेतेषां राज्यकालःसंक्षेपेणात्र निर्दिष्टः ।

विद्यापतिः प्रथमे वयसि महामहोपाध्यायहरिमिश्रात् व्याकरण-न्याय-मीमांसादिशास्त्राणि समधीत्य पद-वाक्यप्रमाण-पारावारीणो बभूव । अयं हि अधीत-सकलशास्त्रस्य स्वप्रणीतग्रन्थेषु समुपयोगं चकारेति विद्यापति-वाङ्मयपरिशीलनेन परिज्ञायते ।

आध्यात्मिकजीवने विद्यापतिः परमवैष्णवः सन्नपि अद्वितीयशैवः शाक्तश्चासीत् । वस्तुतोऽयं हरि-हराद्वैतं मन्वानः

रुद्रस्य परमो विष्णुर्विष्णोश्च परमः शिवः ।
एक एव द्विधाभूतो लोके चरति नित्यशः ॥
न विना शंकरं विष्णुर्न विना विष्णुना शिवः ।
तस्मादेकत्वमायातौ रुद्रोपेन्द्रौ तु तौ पुनः ॥[१]

इति हरिवंशानुसारं स्वसिद्धान्तमधस्तनेन गीतेन निरूपयति—

भल हर भल हरि भलतुअकला,
खन पित वसन खनहिं बघछला।

...

भनइ विद्यापति विपरित वानि।
ओ नारायण ओ सूलपानि॥[२]

एतस्य संस्कृतरूपान्तरम्—

१. शैवसर्वस्वसारे श्लोकसंख्या २३,२४ ।
२. पद्यावली-प्रार्थनाभागे गीतसंख्या ४ ।

एकस्त्वं खलु भगवन्! हरि-हर-नेपथ्यभेदमात्रेण।
भासि द्विधा विभिन्नो लीलारसिकः स्वतन्त्रेच्छः॥ १॥
त्वमिह कदाचिद् वसनं परिधत्से दीप्त-पीतिमोल्लसितम्।
अपरस्मिन् खलु काले धत्से व्याघ्राजिनं परुषम्॥ २॥
पञ्चाननतां काले स्वीकुरुषे त्वं यदृच्छया देव!
पुनरस्मिन् समये चतुर्भुजो भासि विष्णुस्त्वम्॥ ३॥
गोकुलमवतीर्णस्त्वं कुरुषे गोचारणं मुदा विपिने।
डमरुनिनादं कुर्वन् भैक्ष्यपरस्त्वं पुन र्भ्रमसि॥ ४॥
बर्हापीडः कृष्णस्तनुषे वृन्दावने महारासम्।
भस्मोद्धूलितमूर्तिस्त्वमेव काले पुरारातिः॥ ५॥
एकन्तेऽस्ति शरीरं वसति स्थानं तथापि ते द्वितयम्।
वैकुण्ठेऽसि कदाचित् कैलासे चान्यदा भवसि॥ ६॥
भणति कविर्विद्यापतिरेषा वाणी तु भाति विपरीता।
यो नारायणरूपः स एव शूली मतो देवः॥ ७॥[1]

एतस्य राधा-माधव-विषयकाणि विपुलानि गीतानि एकतः श्रीकृष्णे एकान्त-भक्तिं सूचयन्ति, परतश्च एतेनैव विरचितानि 'नचारी'ति संज्ञकानि विविधानि मैथिली-गीतानि, विविधग्रन्थेषु प्रणीतानि मङ्गलात्मकानि पद्यानि, दैनन्दिनजीवने विहितानि शिव-सेवापराणि पूजोपासनानि च अस्य परमां शिव-भक्तिं प्रकाशयन्ति। एतस्य शिव-भक्ति-विषये एवमनुश्रूयते—

१. विद्यापतिशतकम्, गीतसंख्या ६।

अस्यैकान्तसेवयाऽऽकृष्टो भक्तवत्सलो भगवान् आशुतोषशंकरः 'उगना'-नामकेन भृत्यरूपेण अस्य सेवकत्वं स्वीचक्रे। एकदा एतद्रहस्यस्य समुद्घाटनात् उगनारूपः शिवः अन्तर्हितोऽभवत्, येन व्याकुलितमना महाकविः विक्षिप्त इव **"उगना रे मोर कतए गेला"** इत्यादि गीतं गायन् इतस्ततो बभ्राम। एतद् गीतमद्यापि मिथिला-निवासिनां कण्ठेषु गुञ्जन्ति। **"करवन हरब दुख मोर हे भोलानाथ"** इत्यादि 'नचारी' गीतानि गायन्तः शिवभक्ता अद्यापि भावातिरेकेण विह्वला भवन्ति।

महाकविः यथैव राधामाधवयोरुपासकः शिवोपासकश्चासीत् तथैव दुर्गादि-शक्तेरपि समुपासकः। आदिशक्तेः सर्वाधिकं महात्म्यं वर्णयन् महाकविर्लि-खति—

ब्रह्मापि यान्नौति नुतः सुराणां

यामर्चितोऽप्यर्चयतीन्दुमौलिः।

यां ध्यायति ध्यानगतोऽपि विष्णु—

स्तामादिशक्तिं शिरसा प्रपद्ये॥"[१]

वस्तुतो मिथिलायाः परम्परानुसारेण महाकविः पञ्चदेवोपासक आसीत्। अतो व्यवहारे समानरूपेण दुर्गा-शिव-विष्णु-गणपति-सूर्यदेवानां स्तुतिं विधत्ते। न चैव एतेषु तारतम्यं न वा भाव-वैषम्यं क्वापि किमपि प्रदर्शयते।

विद्यापतेः प्रसृत्वरी बहुमुखी प्रतिभा तदानीन्तनीं सामाजिकीं दुरवस्थाम्, राजनैतिकीमस्थिरताम्, व्यावहारिकीं प्रतिपक्षताम्, पारिवारिकीं निरपेक्षताम्, यात्रनीं दुराचारिताम्, प्राशासनिकीं पक्षपातिताञ्च सूक्ष्मेक्षिकया निरीक्ष्य सम्यग् वर्णयति स्म। विद्यापति-साहित्य-दर्पणे सर्वा इमाः परिस्थितयः स्पष्टमवलोक्यन्ते।

---

१. पुरुषपरीक्षा-मङ्गलश्लोकः।

विद्यापतेर्विविधा रचना अवलोक्य मनीषिणः महाकवेरस्य द्विविधं रूपं निर्धारयन्ति। महाराजशिवसिंहस्य समुत्कर्ष-शासन-समयपर्यन्तम् (१४०६ ख्रीष्टाब्दं यावत्) असौ नूतन-काव्यस्य स्रष्टा-निर्मातासीत्। नवनवोन्मेषशालिन्या प्रतिभयाअमुष्य भारती नियतिकृतनियम-रहिताम्, ह्लादैकमयीम्, अनन्यपरतन्त्राम्, नवरस रुचिरां काव्यनिर्मितिमादधती समाजे प्रमोदामोदमावहन्ती चरमोत्कर्ष-सीमां चुम्बति स्म। एतस्मिन्नेव समयावधौ पदावली-कीर्तिलता-कीर्तिपताका-भूपरिक्रमण-पुरुषपरीक्षा-मणिमञ्जरी-गोरक्ष-विजयरूपाः सर्जनात्मिका एतदीया अर्थ-काम-पुरुषार्थ-प्रधानारचना लोकगोचरीभूता दरीदृश्यन्ते। अमीषु दिवसेषु गुम्फितेष्वेव मैथिलीगीतेषु माधुर्यं पराकाष्ठामधिरोहति, उद्दाममांसल-सम्भोग-शृङ्गारः मानसोन्मादं विदधाति, कोऽप्यनिर्वचनीय-रस-परिपाकः कामपि विलक्षणा-मास्वाद्यतामादधाति, ब्रह्मानन्दसहोदरतामुपयाति, सात्त्विक-व्यभिचारिभावादिभिः परिपोषमुपेयुषीमसाधारण-विशिष्टामनुभूतिञ्चानुभावयति। हिमगिरेः प्रवाहिता स्रोतस्विनीव अस्माद् गीत-कदम्बान् निष्यन्दमाना शृङ्गार-निर्झरिणी निर्बाधं निर्भरं प्रवहति, यामवगाह्य केचन धन्यतमा रसिकविचक्षणाः "रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवति"ति श्रुति-वाक्य-निर्दिष्टम् पुण्यशालिभिर्महात्मभिर्जुष्टम् सम्म-दानन्दनिर्भरं रसतत्त्वं समनुभवन्ति। अत एव अमूनि गीतानि निर्जराणि अमराणि सन्ति विलसन्ति।

चक्रनेमिक्रमेण निरन्तर-परिवर्तनशीले संसारेऽस्मिन् न कोऽप्यनवरतं सुख-मेवानुभवति। कालचक्रात् सुखमिवदुःखमपि नैयत्येन परिस्फुरति। एवमेव दैव-दुर्विपाकात् शिवसिंहदेवे अन्तर्हिते महाकवेर्मनसि अशाश्वतस्य दुःखालयस्यास्य संसारस्य असारता शनैः शनैः पदमाधत्त, येन निरन्तर-साहचर्यमुपेयुषी चित्राम्बरा भारती काषाय-वसनं परिदधाना भक्तिभावैकशरणा समजायत। अत एव परवर्ति-समयेषु रचितानि एतदीयानि गीतानि धर्म-परलोक-पराणि सन्ति।

संस्कृतेऽपि श्रुति-स्मृति-पुराण-धर्मशास्त्र-दण्डनीति-लोक-व्यवहारोपास-नादि-विषयका एव ग्रन्था जीवनस्योत्तरभागे एतेन प्रणीता उपलभ्यन्ते।

जीवनस्य अवसान-वेलायां सन्निहितायां सर्वतोऽनासक्ति भावयतो महाकवेः आराध्यदेवं समुद्दिश्य भक्ति-भाव-परायाः प्रार्थनायाः हृद्यानि पद्यानि उपलब्धानि भवन्ति ।

यथा हि—

स भक्तवत्सलं शिवं प्रार्थयते—

भगवन् ! कथमहं संसार-सागरं पारयेयम् ?[१]

आशुतोष ! कदात्वं मे दुःखं हरिष्यसि ?[२]

स कदाचिद् वैकल्येन सकलकलुषसंहारिणीं भगवतीं भागीरथीं निवेदयते— *'मातः ! अन्तसमये मां मा विस्मरेः*[३]

स कदाचित् आराध्यं माधवं सम्बोधयति— *माधव ! सविंनयं त्वां प्रार्थये । सतिलतुलसीदलेन संकल्प्य त्वामेव शरणं समागतः । अतो दयालुना त्वया सकृपमहं रक्षणीयः ।*[४] *माधव, अहन्तु परिणाम-चिन्तया सर्वथा निराशोऽस्मि ।*[५]

एवं हि महाकविः जीवनावसान-वेलायामेवं चिन्तयन् स्वात्मोद्धाराय आराध्यमाराधयति ।

---

१. शिवहो, उतरब पार कओन विधि । पदावली प्रार्थनागीत ११

२. करवन हरब दुखमोर, हे भोलानाथ । तत्रैव गीत-१५

३. बड़ सुखसार पाओल तुअतीरे, छाड इत निकट नयन बह नीरे ।

भनइ विद्यापति समदओं तोही, अन्तकाल जनु विसरह मोही ॥ गीतसं. २२

४. माधव, बहुत मिनति कर तोय ।
दए तुलसी तिल देह समर्पिनु, दया जाने छाडबि मोय ।

भनइ विद्यापति अतिशय कातर तरइत इह भव-सिन्धु ।
तुअ पद-पल्लव करि अवलम्बन, तिल एक देह दिनबन्धु ॥ तत्रैव गीत सं. २५

५. माधव, हम परिनाम निरासा ।
भनइ विद्यापति— अब तारन भार तोहारा । तत्रैव गीत सं. २६.

अनवरतमेवविध-भक्ति-भावना-निमग्नो महाकविः एकदा निशावसाने प्रिय-वयस्यं दिवंगतं महाराज-शिवसिंहं द्वत्रिंशान्मित[1]वर्षानन्तरं स्वप्ने व्यलोकयत्। ततश्च आत्मनो देहावसानमासन्नं-परिलक्ष्य समस्त-परिवारं सम्बोध्य भगवत्या-भागीरथ्याः पावने जीवने शरीर-पातेन जीवात्मनो मुक्तिं कामयमानः सपरिवारः पुण्यसलिलां जाह्नवीं समुद्दिश्य शिविकामारुह्य स्वसदनात् प्रतस्थे।

एवं हि गच्छन् यदा स गङ्गाया अनतिदूरं क्रोशद्वयमितं देशमवाप तत्रैव शिविकां स्थापयितुमादिदेश। परिकरजनैः साशङ्कं परिपृष्टो महाकविः सदृढं प्रत्युवाच— *दूरतः एतावन्तमध्वानमतिक्रम्य जनन्याः शरणमहमागतोऽस्मि। सदया माता मादृशं दुःखार्त्तं समुद्धर्तुं क्रोशद्वयमात्रमतिक्रम्य मदन्तिकं किं नागमिष्यति?* हठात् तत्रैव स्थित्वा जननीं जाह्नवीं समुद्दिश्य ध्यानावस्थित-मानसो बभूव। ततश्च दयाद्रमानसा भक्तवत्सला जननी जाह्नवी कलकलनिनादमिषेण '*इयमहमागतास्मी*'ति सूचयन्ती उच्छून-तरङ्ग-व्याजेन अभयमुद्रया करं दर्शयन्ती प्रधानप्रवाहमार्गादीषद् वक्रं पन्थानमाश्रित्य क्रोशद्वयमितं भक्ताधिष्ठितं देशं समागत्य सलिलाञ्चलेन वत्सं समाच्छाद्य प्रवाहान्तरितं व्यधात्।

साश्चर्यं पश्यत्सु समवेतेषु सर्वेषु परिजनेषु जाह्नवी-जय-घोषं विदधत्सु समुपस्थितेषु लोकेषु तापत्रयापहं-शान्तिकरं पावनं गाङ्गजलं पायं पायं महाकविः खीष्टीय-चतुर्दशशतक-मध्यभागे कार्तिकधवल-त्रयोदश्यां[2] स्वाभीष्टवेलायां नश्वरं शरीरं विहाय अविनश्वरं परम-प्रमोदार्णवं प्रविवेश।

तीर्थायितं पवित्रं स्थानमिदं पूर्वोत्तररेल-मार्गे हाजीपुर-बछवारा-खण्डान्तराले विद्यापतिनगराभिधेयस्य स्टेशनस्य समीपे विद्यते, यत्र विद्यापते-श्चिताभूमौ शिवशंकरेण सनाथं मन्दिरमेकं पुरातन-वृत्तान्ताभिधायकमद्यापि विराजतेतराम्।

---

१. सपन देखल हम सिवसिंह भूप बतिस बरस पर सामर रूप।
बहुत देखल गुरू-जन प्राचीन आब भेलहुं हम आयु-विहीन। तत्रैव।

२. विद्यापतिक आयुअवसान,
कातिक धवलत्रयोदसि जान। तत्रैव।

उत्तरभागः

कृति-परिचयात्मकः

. जननान्तरानुगतया आलौकिकप्रतिभया सम्पन्नः, श्रुति-स्मृति-पुराणेतिहास-धर्मशास्त्र-दर्शन-व्याकरणच्छन्दोविचिति-दण्डनीति-कोश-काव्य-नाट्य-कलादि-परिशीलन-जन्य-निपुणतया व्युत्पन्नः, निरन्तर-विविधविध-काव्यादि-रचनाभ्यास-कृत-शारदोपासनः शरच्चन्द्रमरीचि-कीर्तिः महाकवि र्विद्यापतिः स्वकाव्यकला-कौशलेन धर्मकर्मोपासना-लोकव्यवहारादि-विषयक-विविधरचना-चमत्कारेण च अद्यापि विद्यते विश्वस्मिन् वन्दनीयः ।

संस्कृत-प्रकृतावहट्ट-मैथिली-भाषासु समानरूपेण भावानभिव्यक्तुं समर्था अमुष्य नमस्या लेखिनी मनीषीभिर्नितरां प्रशस्यते ।

महाकवि प्रणीतानां ग्रन्थानां प्रकृतप्रबन्धेऽत्र कालक्रमानुसारं प्रस्तूयते संक्षेपेण परिचयः ।

१. कीर्तिलता

(महाराज-कीर्तिसिंह-प्रशस्ति-रूपा)

अपभ्रंश-स्वरूपायामवहट्टभाषायां विरचितेयम् **कीर्तिलता** महाराजकीर्ति-सिंहस्य कीर्ति-वल्लरीं पल्लवयति । तदानीन्तने काले संस्कृतेतर-भाषा-निबद्धः प्रबन्धो बुध-जनेषु प्रशास्त्यं न लभते स्मेति जाननोऽपि महाकविः तदाक्षेप-मसह-मानो ग्रन्थेऽस्मिन् प्रयुक्ताया भाषाया महत्त्वमौचित्यञ्चैवं प्रदर्शयति—

बालचन्द्रः विद्यापति-भाषा च दुर्जनोपहास-कालुष्येण न कदापि संस्पृश्येते । यतो हि बालेन्दुः शंकरस्य शिरसि शोभते इयञ्च (महाकवे र्भाषा) नागरजनान्

मोहयति[१] अपरञ्च संस्कृतभाषा बुधजनानेव मोदयति। प्राकृतभाषारसस्य मर्म न बोधयति। देश्यभाषा सर्वजनमधुरा भवति। अतः अवहट्टभाषायामेव विषयमिमं निबध्नाति।[२]

अवहट्ट भाषाश्रितायामप्यस्यां प्रथमरचनायां महाकविः सुललित-संस्कृत-पद्य-विरचन-कौशलं-प्रसङ्ग-विशेषं प्रदर्शयति—

तथाहि प्रारम्भे भारतीं वन्दमानः—

"द्वाः सर्वार्थसमागमस्य रसना-रङ्गस्थली-नर्त्तकी
तत्त्वालोकन-कज्जल-ध्वजशिखा वैदग्ध्य-विश्रामभूः।
शृङ्गारादि रस-प्रसाद-लहरी-स्वर्लोक-कल्लोलिनी
कल्पान्तस्थितिकीर्ति-सम्भ्रमसखी सा भारती पातु वः॥"

कीर्तिलतायाः प्रथमं पल्लवं जौनपुराधीशस्य इब्राहिमशाहसुरतानस्य साहाय्येन पितृ-हन्तारम् असंहाननामकं तुरुष्कं पराजित्य तद्विजय-प्राप्तहर्षोल्लासस्य समधिगतराज्यस्य कीर्तिसिंहस्य विजय-कीर्ति-वल्लरीं वीररसाप्लुतां विदधानो-महाकविः अधस्तनपद्येन समापयति—

ईश-मस्तक-विलास-पेशला

भूति-भार-रमणीय-भूषणा।

कीर्तिसिंहनृप-कीर्तिकामिनी

यामिनीपति-कलां ज़िगीषति॥

अग्रे च जौनपुर-नगरस्य उत्तुङ्ग-गगनचुम्बि-प्रासाद-मालायाः, क्रय-विक्रय-निमित्त-प्रचलज्जनाकीर्ण-विपणिकायाः, कामोपचार-कुशलाया वाराङ्गनायाः, प्राप्ता-

---

१. बालचन्द विज्जावइ भासा। दुहु नहि लग्गइ दुज्जन हासा।
ओ परमेसर हर सिर सोहइ। ईणिच्चय णाअर मण मोहइ॥

२. सक्कय वाणी बहुजण भावइ पाउंअ रस को मम्म ण पाबइ।
देसिलवयणा सबजणमिट्ठा तैं तइसौ जम्पौं अवहट्टा॥ कीर्तिलता

धिकारस्य दुर्विनीतस्य अधिकारि-वर्गस्य दुराचरणस्य, दुरवस्थापन्नस्य विप्रसमाजस्य, सैनिक-प्रयाणस्य,समर-कोलाहलस्य च चित्रात्मकं प्रत्यक्षायमाणं वर्णनं विद्यते ।

तदानीन्तनसमाजे पौरुषानुकूलकृत्यस्य परमावश्यकत्वं मन्यमानो महाकविः ग्रन्थेऽस्मिन् इत्थं निर्दिशति—

पुरुषः पौरूषकर्मणैव वस्तुतः पुरुषो भवति न तु केवलं पुरुषरूपेण जन्मना यथा जलदानेनैव जलदो लोके जलदेत्यभिख्यां लभते, अन्यथा स तु धूमस्तोम एव । एतस्मिन् प्रसङ्गे पुराणादि-प्रसिद्धान् विष्णु-राम-भगीरथ-परशुरामादि-पुरुष-पुङ्गवान् निर्दिश्य गणेश्वर-तनूजं कीर्तिसिंहं प्रशंसति, यो हि समराङ्गणे पितृ-वैरिणं शत्रुं सम्मर्द्य स्वपौरुषं प्रदर्शयामास । एवंहि शृङ्गार-वीर-रस-समुच्छलितस्य कीर्तिलतारूपस्यास्य ग्रन्थस्य समापनम् महाराज-कीर्तिसिंहस्य शौर्य-वीर्य-सम्भृतां कीर्तिम्, दिग्दिगन्त-व्यापिनीं स्वकीयां भारतीञ्चाधिकृत्य अधस्तन-पद्येन विदधाति—

एवं सङ्गर-साहस-प्रमथन-प्रालब्ध-लब्धोदयां
पुष्णाति श्रियमाशशाङ्कतरणिं श्रीकीर्तिसिंहो नृपः ।
माधुर्य-प्रसव-स्थली गुरूयशोविस्तार-शिक्षा-सखी
यावद्विश्वमिदञ्च खेलतु कवेर्विद्यापतेर्भारती ॥

२. भूपरिक्रमणम्

(भारतीयभौगोलिक-विशिष्ट-स्थान-परिचयात्मकम्)

ख्रीष्टीयचतुर्दश-शतकान्ते जीवनस्यान्तिमे भागे पारलौकिक-स्वाराज्य-कामो महाराजदेवसिंहो-नैमिषारण्यमध्युवास । तत्रैव महाराजस्य निदेशात् विद्यापतिः **भूपरिक्रमण**[१]—ग्रन्थ-लेखनं प्रारेभे ।

१. 'भूपरिक्रमा' इत्यपि नामान्तरम् ।

पञ्चषष्टिदेशानाम् चतुर्षु खण्डेषु भौगोलिक—वर्णनं कर्तुं ग्रन्थयोजनां महाराजं कथयित्वा महाकविः तस्या रुच्यनुकूलां कथां क्रमशः कथयितुं प्रारभत। यथा हि ग्रन्थादौ मङ्गलमाचरणम् महाकवि र्निदिशति—[१]

एकदा भगवतो वासुदेवश्रीकृष्णस्याग्रजो बलदेवः नैमिषारण्ये अग्निपुराण-वक्तारं वह्नि-समुद्भवं-पुराण-निपुणं मुनिपुङ्गवं सूतं केनापि कारण-विशेषेण क्रुद्धः सन् व्यापादयामास। ततः परं ब्रह्महत्यामहापातकेनानुतप्तः ग्लानो म्लानश्च काम-पालो मुनीनां शरणं ययौ। मुनिवृन्देन आदिष्टः पाप-पङ्क-प्रक्षालनार्थंपृथिव्याः प्रदक्षिणां कर्तुमारेभे।

नैमिष-स्थानात् प्रचलितो बलभद्रो द्रुपद-देशमाजगाम, यत्र महामाया काली-देवी विराजते स्म। एतस्याः पूजनेन आत्मानं पवमानः गङ्गातीर-समीपवर्तिनीं शतत्रयग्राम-समृद्धि-शालिनीं शीलादिगुण-सम्पन्न-नर-नारी-समन्वितां पृथुकां

---

१. नत्वा गणपतिं साम्बं श्रीविष्णुं रविमम्बिकाम्।
भूपरिक्रमणग्रन्थो लिख्यते भुवि नैमिषे॥
देवसिंहनिदेशाच्च नैमिषारण्य-वासिनः।
शिवसिंहस्य च पितुः सूनपीठ-निवासिनः।
पञ्चषष्टिदेशयुतां पञ्चषष्टिकथान्विताम्।
चतुष्खण्ड-समायुक्तामाह विद्यापतिः कविः॥
पुराणानि च तन्त्राणि काव्यानि स्वमनीषया।
विलोक्य राज-वृत्तानि नवरत्नकृतानि च॥
देवसिंहस्य रुचये कविर्विद्यापतिर्महान्।
वक्तुमारब्धान् नानाप्रस्थानालङ्कृताः कथाः॥
अग्निपुराणवक्तारं सूतं वह्नि-समूद्भवम्।
जघान बलदेवो हि मस्तकमृषि-मण्डले॥
ब्रह्म-हत्यायुतो देवो मुनि-वाक्यान्महीपते।
आरेभे पापशान्त्यर्थं पृथिव्या हि प्रदक्षिणाम्॥

राजधानीं समागत्य दिवसत्रयं तस्थौ। तत्रैव शातनीपुरे त्रिदेशेश्वरीं भैरवीं नानाविधानैः सम्पूजयामास। ततः कालकाठके द्रुपदनरेशस्य शस्त्रागारं व्यलोकयन् अन्यानि च वेणुपुर-किंशुक-काननादिस्थानानि पश्यन् मालवदेशाधिपतेर्भानुमन्तस्य[१] काष्ठाग्रामे विहित-वसतिं सर्वज्ञं मुनिपुङ्गवं धौम्यं निकषा समाययौ। मुनिना समादृतः समुपदिष्टश्च हलायुधः तस्यैव पथ-प्रदर्शकत्वे ततस्थानाच्चलितः विभिन्नतीर्थस्थानेषु परिभ्रमन् जनक देश-पर्यन्तमाययौ। महामुनिर्धौम्यः रात्रौ श्रमापनोदाय मनोविनोदाय च बलदेवाय मनोहरां कथां श्रावयामास।

कथोपक्रमे त्रिकालज्ञोमुनिरेवं सम्बोधयामास—

नयानुरोधने गुणेन वाचां कथा रसस्यापि कुतूहलेन।

बुधोऽपि वैदग्ध्य-विशुद्धचेताः प्रपञ्चमाकर्णयिता न किं मे॥

भाविकथां कलि-सार्थां यथा भूप-विचेष्टिताम्।

कथयामि कामपालः! तव ज्ञान-विवृद्धये॥[२]

एवं हि समुपलब्ध-भूपरिक्रमण-ग्रन्थे नेमिदेश-ब्रह्मावर्त-यज्ञभूमिप्रयाग-काशीक्षेत्र-सिद्धदेश-नृसिंहदेश-जनकदेशेति सप्तानां देशानां विवरणं विद्यते। एतेषु सप्तसु देशुषु प्रसिद्धानि शतशस्तीर्थस्थानानि वर्णितानि सन्ति।

कथाप्रसङ्गे च नेमिदेश-विविरणे-दानवीरकथा, ब्रह्मावर्त-विवरणे दयावीर-कथा, यज्ञभूमि-विवरणे-युद्धवीर-कथा, काशीक्षेत्र-विवरणे सत्यवीर-कथा तथा प्रत्युदाहरणरूपा चौरकथा, सिद्धदेश-विवरणे-भीरूकथा, नृसिंहदेश-विवरणे-कृपणकथा, जनकदेश-विवरणे-अलसकथेति अष्टौ कथा व्यावर्णिताः सन्ति। इमाश्च सर्वाः कथा महाकवि-र्विद्यापतिः स्वकीये "पुरुषपरीक्षा" ग्रन्थेऽपि कथासु कथयाञ्चकार।

---

१. नाम-ग्रामयोर्व्युत्पत्तिर्नास्ति।

२. भूपरिक्रमणे पृ.३।

ग्रन्थस्यास्य प्रणयन-समये पञ्चषष्टेर्देशानाम् पञ्चषष्टेः कथानां चतुर्षु खण्डेषु वर्णनस्य विद्यापतेर्योजनासीत्। किन्तु एकस्मिन्नेव खण्डे सप्तानां देशानाम् अष्टानाञ्च कथानां वर्णनं विधाय महाकविः प्रकृतग्रन्थस्य समापनं व्यधात्। तत्र कारणन्त्विदमेव अनुमीयते यत् १४०२ खीष्टाब्दे महाराजदेवसिंहे दिवंगते प्रधान-श्रोतुरेव असान्निध्यात् प्रकृतग्रन्थस्य योजनानुसारं लेखनकार्यमेवावरुद्धमभवत्।

महाकविना निबद्धेषु संस्कृत-ग्रन्थेषु प्रथमेऽस्मिन् ग्रन्थे प्रयुक्ता प्रसादमयी सरला संस्कृता वाणी पाठक-विचक्षणैरनायासेन आत्मसात्क्रियते। भौगोलिक-वर्णने तीर्थस्थलानां माहात्म्यं प्रदर्शयता महाकविना प्रसङ्गानुकूलामुपदेशमयीं विविधां कथां संघटयता ग्रन्थस्यास्य समुपयोगिता संवर्धयाञ्चक्रे।

३. पुरुषपरीक्षा

(दण्डनीतिसहितपुरुषार्थ-प्रतिपादक-कथात्मिका)

अभिनवजयदेवविद्यापतिः महाराज-देवसिंहे जीवत्येव[१] शिवसिंहदेवस्य निर्देशाद्[२] दण्डनीति-विषयकं पुरुषपरीक्षाग्रन्थं विरचयाञ्चकार। अतोऽस्य रचना-कालः ख्रष्टीय-चतुर्दश शतकान्तं संस्पृशति।

कथा माध्यमेन दण्डनीति-राजधर्मादि-समुपदेशकं पञ्चतन्त्रहितोपदेश-प्रति-रूपं सरलसंस्कृत-भाषा-निबद्धं पुरुष परीक्षा-ग्रन्थरत्नं संस्कृतकथा-काव्य-परम्प-

---

१. सक्कुरीपुर-सरोवर-कर्ता हेमहस्ति-रथ-दान-विदग्धः। भाति यस्य जनको रणजेता देवसिंहनृपतिर्गुणराशिः। पुरुषपरीक्षा ग्रन्थान्ते शलो.सं. २१

२. यो गौडेश्वर-गज्जनेश्वर-रणक्षोणीषु लब्ध्वा यशो
दिक्कान्ता-कुच-कुन्तलेषु नयते कुन्दस्रजामास्पदम्।
तस्य श्रीशिवसिंहदेवनृपतेर्विज्ञप्रियस्याज्ञया,
ग्रन्थं ग्रन्थिल-दण्डनीति-विषये विद्यापतिर्व्यातनोत्॥ तत्रैव-३१

रायां कामप्यपूर्वां विच्छित्तिं समुन्मीलयति। ग्रन्थरत्नमिदं कोमलमतीनां शिशूनां कृते नीति परिचयं कामकलाविलासिनीनां कृते अमन्दामोदं निश्शङ्कं विधास्यते[१] इति निश्चिन्वानो महाकविः शिवसिंह-निदेशमङ्गीकृत्य कथारत्नमिदं रचयामास।

प्राचां कृतयुगीनानां महासत्त्वानां सुचरितानि विषय-वस्तुत्वेन असंगृह्य इदानीन्तनानामेव महापुरुषाणां चरित्रोत्कर्षप्रकाशने बीजं निर्दिशन् प्रतिपादयति महाकविः—

कलौ शिक्षाहेतुर्न खलु कृतजातस्य चरितम्
क्रियायां दृष्टान्तः समयकृतभेदो न घटते।
न सा बुद्धिः पुंसां न च वपुषि तेजस्तदधुना
न वा सत्यं तादृक् कलिसमयसंजात-जनुषाम्॥[२]

स्वप्रबन्ध-विषये च कविः विश्वास-दृढतां प्रकटयन् नीर-क्षीर-विवेकिषु मनीषिषु ग्रन्थस्यास्य समादरो भविष्यत्येवेति निगदति—

नयानुरोधेन गुणेन वाचां कथारसस्यापि कुतूहलेन।
बुधोऽपि वैदग्ध्य-विशुद्ध चेताः प्रबन्धमाकर्णयिता न मे किम्।[३]

ग्रन्थस्य पुरुषपरीक्षे'ति नामकरणे बीजं प्रदर्शयन् प्राह महाकविः—

पुरुषाः परिचीयन्ते युक्तेरस्याः परीक्षया।
तत् पुरुषपरीक्षेयं कथा सर्वमनःप्रिया॥[४]

---

१. शिशूनां सिद्ध्यर्थं नयपरिचितेर्नूतनधियां मुदे
पौरस्त्रीणां मनसिज-कला-कौतुकजुषाम्।
निदेशान्निश्शङ्कं सपदि शिवसिंहस्य नृपतेः
कथानां प्रस्तावं विरचयति विद्यापति-कविः॥ तत्रैव प्रारम्भे श्लो० ३

२. तत्रैव प्रथमपरिच्छेदे श्लोकसं० १३।

३. तत्रैव प्रस्तावनाश्लोक सं ४।

४. तत्रैव श्लोकसं०५

कथम्प्रबन्धारम्भे कविकर्मकौशलेन महाकविरित्थं कथामवतारयति—

आसीदासमुद्र-क्षितिपति-सहस्र-शिरोमाला-रञ्जित-पादपद्मश्चन्द्रातपायां पुरिपारावारोनाम राजा। तस्य सर्वावयवसुन्दरी सर्वलक्षणसम्पूर्णैका पद्मावती नाम कन्यका बभूव। तस्याश्च शैशवापगममालोक्य स राजा तदनुरूपं स्वकुल-योग्यं च वरमनुसन्दधानः सचिन्तो बभूव।

ततो भूपतिः सुबुद्धिनामानमृषिमुपगम्य पप्रच्छ—मुने! ममेयं पद्मावती नाम कन्या। तत् कमेतस्या वरं करवाणीति विमृश्यादिशतु भवान्। मुनिरुवाच—राजन्! पुरुषं वरं कुरु। कथमपुरुषोऽपि वरः संभवतीति राजनि परिपृच्छति मुनिः प्रत्युवाच—राजन्! पृथिव्यां बहवः पुरुषाः सन्ति। तत् पुरूषाकारान् परित्यज्य वरयेति ब्रवीमि। तथा हि—

लभ्यन्ते पुरुषाकाराः पुरुषः खलु दुर्लभः।
वक्ष्यमाणेन चिह्नेन निखिलेनोपलक्षितः॥

तद्यथा—

वीरः सुधीः सविद्यश्च पुरुषः पुरुषार्थवान्।
तदन्ये पुरुषाकाराः पशवः पुच्छवर्जिताः॥
वीरः शौर्य-विवेकाभ्यामुत्साहेन च मण्डितः।
मातापित्रोरलंकर्तुं कुले कुत्रापि जायते॥
शौर्यं कार्पण्य-राहित्यं विवेको धीर्हिताहिते।
क्रिया प्रवृत्तिरुत्साहो वीरस्तैस्तु भवेत् त्रिभिः॥[१]

इति वीरं लक्षयित्वा दानवीर-दयावीर-युद्धवीर-सत्यवीर-रूपेण वीरस्य चातुर्विध्यं प्रतिपाद्य

---

१. तत्रैव प्रथमपरिच्छेदे श्लोकसंख्या—८-१२१

दानवीरो हरिश्चन्द्रो दयावीर-शिबिर्नृपः ।
युद्धवीरो भवेत्पार्थः सत्यवीरो युधिष्ठिरः ॥

इति चतुर्विधान् वीरान् नामग्राहं निर्दिदेश ।

एतत्प्रसङ्गे हि दानवीरादीनां विविधाः कथाः कथयाञ्चकार ।

एवंहि चतुर्षु परिच्छेदेषु विभक्तायाः पुरुषपरीक्षायाः

प्रथमे परिच्छेदे निम्न-लिखिताः अष्टौ कथागुम्फिताः सन्ति—

१. दानवीर-कथा

२. दयावीर-कथा

३. युद्धवीर-कथा

४. सत्यवीर-कथा

५. चौर-कथा

६. भीरु-कथा

७. कृपण-कथा

८. अलस-कथा

द्वितीयपरिच्छेदे अधोलिखिताः सप्तकथा विद्यन्ते-

९. सप्रतिभ-कथा

१०. मेधावि-कथा

११. सुबुद्धि-कथा

१२. वञ्चक-कथा

१३. पिशुन-कथा

१४. जन्म-बर्बर-कथा

१५. संसर्ग-बर्बर-कथा

तृतीयपरिच्छेदे अधस्तनाः चर्तुदश कथा वर्तन्ते-

१६. शस्त्रविद्य-कथा

१७. शास्त्रविद्य-कथा

१८. वेदविद्य-कथा

१९. लोकविद्य-कथा

२०. उभयविद्य-कथा

२१. चित्रविद्य-कथा

२२. गीतविद्य-कथा

२३. नृत्यविद्य-कथा

२४. इन्द्रजालविद्य-कथा

२५. पूजितविद्य-कथा

२६. अवसन्नविद्य-कथा

२७. अविद्य-कथा

२८. खण्डितविद्य-कथा

२९. हासविद्य-कथा

चतुर्थपरिच्छेदे च

(क) धर्मकथासु तिस्रः-

३०. तात्त्विक-कथा

३१. तामस-कथा

३२. अनुशयि-कथा

(ख) अर्थकथासु चतस्रः—

३३. महेच्छ-कथा

३४. मूढ-कथा

३५. बह्वाश-कथा

३६. सावधान-कथा

(ग) कामकथासु पञ्च—

३७. अनुकूल-कथा

३८. दक्षिण-कथा

३९. विदग्ध-कथा

४०. धूर्त-कथा

४१. घस्मर-कथा

(घ) मोक्षकथासु तिस्रः—

४२. निर्बन्धि-कथा

४३. निःस्पृह-कथा

४४. लब्धसिद्धि-कथा

एवं हि साकल्येन ग्रन्थेऽस्मिन् चतुश्चत्वारिंशत् कथा विलसन्ति, या उत्तम-मध्यमाधमप्रकृतीनां मनुजानां सदाचार-दुराचारादि-क्रियाकलापानां, मानव-जीवन-प्रयोजनानां धर्मार्थकाममोक्षाणाञ्च याथातथ्येन विशदं सजीववर्णनं कुर्वन्ति ।

प्रसादगुणमादधानः प्रसङ्गानुकूल-सूक्ति-रत्न-राशि-विभास्वरः कथा-प्रबन्धोऽयं सचेतसां चेतस्सु कामप्यनिर्वचनीयां विच्छित्तिं प्रवाहयति । प्रबन्धरत्न-मिदं परिशीलयन्तो मनीषिणो व्यवहारपाटवं लभन्तेतराम् ।

४. मणिमञ्जरी (नाटिका)

महाराजे शिवसिंहदेवे प्रशासति मिथिलामहीं महाकविः नाटकान्तं कवित्व-मिति कवित्वप्रागल्भ्यं प्रदर्शयितुकामः दृश्यकाव्यस्य उपरूपक-प्रभेदेषु प्राधान्य-मादधानां 'मणिमञ्जरीत्यभिधानां नाटिकां रचयांबभूव ।

भरतमुनिमतमनुसरन् नाट्ये शास्त्र-शिल्प-कलाविद्या-ज्ञान-योगादीनां समेषां विद्यमानत्वं मन्यमानो महाकविः पुरुषपरीक्षायां नृत्यविधकथायामधस्तनश्लोकं समुद्धरति—

न तच्छास्त्रं न तच्छिल्पं न सा विद्या न सा कला।
न तज्ज्ञानं न वा योगो नाटके यन्न दृश्यते ॥

नाट्यं हि दृष्टादृष्टफलजनकत्वेन महत्त्वातिशयमादधातीति स्वमतं नाट्य-शास्त्र-सिद्धान्तेन समर्थयति ।

लीलेयं धनिनां धृतिस्तु सुखिनां शिक्षा प्रमत्तात्मनां
संसार-स्थितिरीदृशीति विरतिर्नानाविधा योगिनाम् ।
प्रीतिः काव्यरसार्थिनां नवनवा कीर्तिः कवीनामियं
विद्यानाटकसंज्ञिता भगवती विश्वोपकारक्षमा ॥[१]

---

१. पुरुषपरीक्षा-नृत्यविद्यकथाश्लोकसंख्या—६ ।

नाट्ये अनुकार्येण सह तादात्म्यरूपतामापन्नोऽनुकर्ता नटोऽपि ब्रह्मानन्दरसास्वादं करोतीति समर्थयन् महाकविः तत्रैव कथाप्रसङ्गे गौडाधिपतिलक्ष्मणसेनस्य सदसि नटन-व्यापार-परायणः गन्धर्वनामा नटः रङ्गभूमौ रामभूमिकां परिगृह्य भवभूतिकृतोत्तररामचरितस्य छायानाटकस्याभिनयं कुर्वाणः राम-सायुज्यमापेति समुदाजहार। तथाहि—

सारण्यानी सवटविटपा हन्त सैव स्थलीयम्

सीता सैव स्पृशति हृदयं सोऽहमेवास्मि रामः।

एवं कान्ता-विरह-विलसद्रामतादात्म्यदिग्धो—

नृत्यावेशान्मुनिरिव नटो रामसायुज्यमाप॥[१]

इत्थं हि प्रकरणमिदं विद्यापतेः नाट्यकलाकौशलं सम्यक् प्रदर्शयति।

प्रकृतनाटिकाया विषयवस्तु प्राचीननाटिकाविषयप्रतिरूपमेव विद्यते।

तद्यथा—

आसीत् प्राचीनसमये चन्द्रसेनो नाम राजा। स चैकदा स्वप्ने चन्द्रकान्तनाम्नो वणिजस्तनयां लावण्यमयीं निरुपमसुन्दरीं मणिमञ्जरी-नाम्नीं लोकयामास। तदासक्तमना राजा तद्विरहमसहमानः मनोरमां तां प्रियतमां प्रमदवने उपायकौशलेन निभृतं समानीय नलिनीदलशीतले सुखमये निकुञ्जे विरह-व्यथां श्लथयितुमारेभे। तदानीमेव राज्ञो ज्येष्ठा राज्ञी पद्मावती प्रमदवनं समाजगाम। मनः शल्यनिभं वृत्तान्तमिमं स्वयमेव पश्यन्ती सातिशयं चेखिद्यते स्म। गुरुतरमानमालम्ब्य पतिदेवं वशीकर्तुकामा शर्वमङ्गलाव्रतानुष्ठानमुररीचकार। व्रतावसानदिवसे व्रतस्य पूर्णताप्राप्त्यर्थं पत्या सह रहसि एकत्रावस्थानमावश्यकमिति मन्यमाना राज्ञी पद्मावती प्रमदवनं समाययौ। तदानीमेव दैव-दुर्विपाकात् प्रमत्तेन दुर्दान्तेन भीषण-निनाद-संत्रासितजन-समवायेन एकेन भयङ्कर-महिषेण प्रमदवने प्रचण्डताण्डवं

१. तत्रैव श्लोकसंख्या—७।

समारब्धम्। श्रुत्वा वृत्तमिदं राजा चन्द्रसेनः सन्नद्धः सन् प्रमदवनमाययौ तं महिषं वशीकर्तुम्। किन्तु तत्र महाराजं प्रतीक्षमाणा महिष-व्यापार-भयाकुला वेपमाना तनुलतिका मणिमञ्जरी राजानमवलोक्य लतेव महातरुं तं समालिलिङ्ग। मणिमञ्जर्या तथा समाश्लिष्टं पतिं समवलोक्य उपायान्तरमपश्यन्ती पद्मावती तस्याः पाणिं ग्रहीतुं पतिमनुरुरोध। एवं हि उभे अपि यथाकालं पति-सङ्गमानन्दमन्वभूताम्। एवं शृङ्गाररस-परिप्लुतमाधिकारिककथावस्तु आधारीकृत्य महाकविर्नाटिकामिमां जुगुम्फ। एतच्च एतस्या मङ्गलश्लोक एव प्रकाशयति—

आनन्देन जडीकृता नवनवोत्कण्ठा समाभ्यागता
लज्जारज्जुनिवर्तिताः क्षणमथो विभ्रान्तकर्णोत्पलाः।
इत्येवं नवसङ्गमोल्लसितयोर्दोलाविलासालसा
दृक्पाताः शिवयोरभिन्नवपुषोर्विघ्नं विनिघ्नन्तु वः॥

ततश्च नाटिकान्तः प्रवहमानं शृङ्गार-रस-धारामृतं समास्वादयितुं रसिकान् पारिषदान् निवेदयति महाकविः—

आनन्दाय रसोर्मि-मग्न-मनसा मासाङ्कविग्रामणी
वृत्तीनां परिशीलनाय यदिदं नाट्यं मया निर्मितम्।
तत् सभ्यान् नववाटिकामृतरसास्वादावधान-श्रमं
याचे काव्यपथप्रयाण-पथिकान् बद्धप्रणामाञ्जलिः॥

नवयौवनोच्छलित-सौन्दर्य-शालिनीं कोमलतनुवल्लरीं मणिमञ्जरीं वर्णयन् महाकविः सहृदयानां चेतांसि एवं रञ्जयति—

पीयूषावधिमाधुरीमधरयन् केनोपमेयोऽधरो-
नेत्राभ्यामिव लज्जया जलनिधौ जातं न पङ्केरुहम्।
अप्यस्या वचनामृतानि सरले शङ्केत कः कोकिले
तन्मन्ये सकलोपमानजयिनी सीमा गुणानां तनुः॥

महाकविना भङ्ग्यन्तरेण वर्णितं तदीयमलौकिकसौन्दर्यं कस्य रसिकस्य मनो वशीकर्तुं न प्रभवति ?

काठिन्यं मुकुलोद्गमे मधुरिमा बालप्रवालाङ्कुरे
रक्ता मौलिकमालिका कुमुदिनी बन्धोर्लयो वीरुधि।
मन्ये विश्वसृजेऽभ्यसूय मदनोऽमर्षादिवोत्सारयन्
सृष्टिं पूर्वविधेर्विधातुमपरामस्यां किमुद्यच्छते॥

एवमेव प्रभाते विभाकर-करपल्लव-स्पर्शमनुभवन्तीं विकसन्तीं कमलिनीं समुद्दिश्य वर्णितमधस्तनपद्यं कस्य न सम्पद्यते परमानन्दाय ?

आश्लिष्टा करपल्लवेन मुकुलव्याजाद्विमुद्रं मुखं
बालेवाम्बुज-बान्धवेन नलिनी विस्मापयन्ती स्थिता।
अप्यालीव समीपमेत्य मधुरारावैर्द्विरेफावली
मन्ये मान-विमोचनाय रचयत्यस्याः पुरो वाचिकम्॥

नाटिकान्ते च नाट्यशास्त्रीयपरिपाटीमनुसरन् महाकविः समाजकल्याणं कामयमानः अधस्तनभरतवाक्येन समापयति नाटिकाम्—

सन्तः सन्तु निरापदो विजयतां राजा प्रजारञ्जने
विप्राः प्राप्तशुभोदयाश्चिरममी तिष्ठन्तु निर्व्याकुलाः।
काले सन्तु पयोमुचो जलमुचः सर्वाश्रमाणामियं
शस्यैः शस्यतरा धरापि नितरामानन्दकन्दायताम्॥

एवं हि मणिमञ्जरी-नाटिका-परिशीलनेन परिज्ञायते यदस्य महाकवेः कवि-कर्म-कौशलं यथा काव्य-रचनायां महनीयतामादधाति तथैव नाट्य-रचनायामपि कामप्यनिर्वचनीयां कलां कलयति।

५. गोरक्षविजयनाटकम्

संस्कृत-प्राकृत-मैथिली-भाषा-निबद्धं गोरक्षविजयनाटकमपि महाराजशिवसिंहदेवस्य साम्राज्य-समये एव महाकविना विरचितमिति *"श्रीविद्यापतिसत्कवीश्वरस्य गोरक्षविजय-नाम-नाटक-नटनाय महाराजाधिराजश्रीमच्छिवसिंहदेवपादैः स्वकौतुकार्थं श्रीमद्भैरव-भक्तये आज्ञापितोऽस्मि"* इति प्रस्तावना वाक्येन निश्चीयते ।

नाटकेऽस्मिन् षड्विंशति-संख्याकानि मैथिलीभाषा-निबद्धानि गीतानि सन्तीति हेतोरिदं मैथिलीनाटकं विद्यते इति निगदन्ति कतिचिन मनीषिणः । किन्तु पात्र-प्रवेशः, वाचिकाभिनयः, प्रकृति-वर्णनादिकं च संस्कृतमाध्यमेन बहुशो दृश्यन्ते, अतः संस्कृतनाटकमिदमिति निश्चिन्वन्ति विपश्चितः ।

नाटकेऽत्र विद्यापतेर्निम्नलिखिता उपाधयः उपलभ्यन्ते—

श्रीविद्यापति **सत्कवीश्वर** इति प्रस्तावनायाम्,

कविकण्ठहार : इति २, १०,१२,१५,१७ संख्याङ्कितेषु गीतेषु,

अभिनवजयदेवः इति २१ संख्याकगीते,

सुकविः इति १६ संख्याके गीते,

कविसरस्वती इति च नवसंख्याकगीते ।

एतैरुपाधिभिर्विज्ञायते यन्महाकविः पूर्णप्रागल्भ्यमवाप्य नाटकमिदं व्यरचयत् । नाटकस्य बहुषु गीतेषु शिवसिंहः रूपनारायणेति विशेषणेन विभूषितोऽस्ति । अतः १४०२-१४०५ खीष्टाब्दमध्ये अस्य नाटकस्य रचनाऽभूदित्यनुमीयते । नाटकस्यास्य उपलब्धाः पाण्डुलिपयः खण्डिताः सन्ति । नान्दी-पाठभागः अद्याप्यनुपलब्ध एवास्ति । नाटकस्य कथावस्तु—

गोरक्षनाथस्य गुरुः मत्स्येन्द्रनाथः योगमार्गं विहाय कदलिपुर-नगरे राज्यसिंहासनमारुह्य भोगमार्गे संलिप्तो भवति । राज्यभारं मन्त्रिषु समारोप्य स्वयम्

अष्टादशभिरभिरामाभिर्विलासिनीभी राज्ञीभिः सह प्रमदवने प्रमोदामोदमानसो भवति । एवं योगपथाद् भ्रष्टं सततम् अर्थ-काम-वासनाग्रस्तं गुरुमवलोक्य गोरक्ष-नाथो मित्रेण काननीपादेन सह वासनापङ्काद् गुरुं समुद्धर्तुं राजद्वारं गच्छति । रागिणो राज्ञो द्वारपालेन अवरुद्धप्रवेशौ तौ कोपाविष्टौ सन्तौ एव शक्तिमत्तां स्वच्छन्दचारितां च सूचयतः । एवं विवदमानेषु तेषु गोरक्षनाथः कानीनपादेन सह मन्त्रयति नटवेशेनैव अनायासेन आवयोरन्तःपुरप्रवेशो भवितुमर्हति । अस्मिन्नेवावसरे मन्त्री तत्र समागच्छति । विदितवृत्तान्तः स समुद्घोषयति न कोऽपि योगी राज्ञः समीपं गन्तुमर्हति । ततश्च सोऽन्तः प्रविश्य अष्टादश मनोहरा राज्ञी राज्ञो मनोवशीकर्तुं साभिनिवेशं निवेदयति ।

तदनन्तरं नटभूमिकौ तौ योगिनौ दौवारिकेण राजानुमत्या प्रवेशितौ । तयोः सम्मोहकनाट्येन अतिप्रसन्नो राजा तत्रैव स्थातुं तौ समादिशति । अस्मिन्नेवान्तराले राज्ञो मत्स्येन्द्रनाथस्य एक एव तनयः बौद्धनाथः क्रीडन्नेव तत्र पञ्चत्वं गच्छति । राजा पुत्रनिधने एतयोरेव नटयोः षड्यन्त्रं विज्ञाय तौ व्यापादयितुमादिशति । निर्दोषिणोः प्रार्थनापरयोरपि तयोर्निरपराधतामस्वीकुर्वन् राजा स्वकीयमादेशं शीघ्रं सम्पादयितुं निर्दिशति । नटरूपो योगी गोरक्षनाथः स्वयोगबलेन बालमुज्जीवयति । चकितेन राज्ञा पृष्टो नटः स्वपरिचयं ददाति । पूर्वजन्मनः सर्वा घटनाः स्मारयति ।

"महायोगी सन्नपि भवान् किमेवं मोहमहागर्ते आत्मानं निपातयति । सर्वश-क्तिमान् भवान् मोहजालं विदीर्य पुनर्योगारूढो भवतु" इत्यादि शृण्वन्नपि नृपतिः मोहपाशेन निगडित इव, विलपन्तीभिर्मनोहराभिः राज्ञीभिराकृष्ट इव, बालकस्नेहेन वशीभूत इव पूर्ववदेव तिष्ठति । ततो गोरक्षनाथः स्वयोगप्रभावेण राज्ञो मत्स्येन्द्रस्य मोहभङ्गं विधाय तं योगमार्गानुसारिणं विदधाति । मत्स्येन्द्रो गोरक्षनाथमालिङ्गति भृशञ्च मोदमानस्तं स्तौति—

गङ्गेवाम्बुनिधेर्हिमाद्रिशिखरं विद्यागुरुं संगता
त्वत्तः स्नेह-निशान्धकारगहने लब्धः प्रभावे मया।
त्वन्मे शिष्य! त्वमत्तपः स्थिरमतिस्त्वन्मे द्वितीयं वपुः
श्रीगोरक्ष! चिरेण जीव जगति त्वत्कीर्तिरुज्जृम्भताम्।।

प्रौढिमानं दधानस्यापि महाकवेः गोरक्षविजयनाटके संस्कृतपद्यविन्यासे न तादृशं कौशलं परिलक्ष्यते। किन्तु प्रसादगुणः सर्वत्र प्रसादयति पारिषदान्।

शरत्समयमधिकृत्य अधस्तनवर्णनं सचेतसां मनो विनोदयति—

पिबति तमः शशिलेखा
विकसति पद्मं हसन्ति कुमुदानि।
लघुरपि राजति तारा
गुरुरपि सीदति पयोवाहः॥

एवमेव प्रभाते सप्तच्छद-गन्ध-लुब्धस्य कमलसौरभ-मुग्धस्य गतागतानि विदधतो भृङ्गस्य स्वाभाविक-वर्णनं सहृदय-चेतश्चमत्करोति—

प्रफुल्ल-सप्तच्छद-गन्धलुब्धा
मुग्धाः प्रभातोत्पल-सौरभेषु।
भृङ्गा उभाभ्यामपकृष्यमाणा—
स्तत्रात्र कुर्वन्ति गतागतानि॥

उपहसन्तं मूढमतिं दौवारिकं प्रति गोरक्षनाथस्य प्रभाववर्णनं नितरां चमत्काराय कल्पते—

संक्षोभयामि नगरं गगनं नयामि
प्रासादमेवं नृपतेर्निभृतं विशामि।
किं सच्चरित्रस्य गुरोरिदानीं
रागानुबद्ध-हृदयस्य रुषो बिभेमि॥

योगप्रभाववर्णनपरे अधस्तनश्लोके निर्दिष्टो दृष्टान्तः कामप्यपूर्वां विच्छित्तिं जनयति—

योगप्रभवेण निसर्गसिद्धः

संसर्गतश्चाथ वशीकृतः स्यात्।

कीरः पठेन्मानुषमध्यवर्ती

नृत्यत्यजस्रं किल वानरोऽपि॥

त्रिभुवनगुरोश्चन्द्रमौलेरन्तेवासिनोऽपि मत्स्येन्द्रनाथस्य सुभ्रुवां भ्रूलता-पाश-बन्धनात् जायमानाया दुर्गतेर्वर्णनं नूनं प्रबोधयति मोहपाशबद्धान्—

अन्तेवासी त्रिभुवनगुरोर्बद्धशीतांशुमौले—

र्मान्यो राजापि ममगुरुर्योगिनामग्रगण्यः।

तत्त्वाबोधोदयवृततनुर्यः स मत्स्येन्द्रनाथः

सीदत्यस्मिन्नहह। सुदृशां भ्रूलता-पाश-बद्धः॥

गोरक्षनाथज्ञानोपदेशात् परं सुप्तोत्थितस्येव प्रबुद्धस्य राज्ञो मत्स्येन्द्रस्य मनोरमास्ता एव विलासिनीः प्रतिवचनं तस्य तत्त्वज्ञानदृढतां प्रदर्शयति—

काष्ठं शिला कुलिशमस्ति कठोर-वर्ग-

स्तेभ्योऽपि गाढमधिकं किल योगि-चेतः।

अस्ति स्थितं कमलपत्रमिवाम्भसैव

नो लिप्यते करुणया, न रसान्तरेण॥

एवं हि मैथिली-गीत-प्रधानमपि नाटकमिदं संस्कृतरचनाकौशलेन संस्कृत-नाटकपक्षेऽपि न ज़हाति महनीयताम्।

इदमत्रावधेयम्—सनातनधर्मावलम्बी सन्नपि विद्यापतिः बौद्धसम्प्रदायानुप्राणित-नाथसम्प्रदायस्य अनुकूलां कथामाधारीकृत्य गोरक्षविजयनाटकं व्यरचयत्।

एतेन महाकविः समाजे धार्मिकीमसहिष्णुतां दूरीकर्तुम् नाथादिसम्प्रदायेनापि सामञ्जस्यं विधातुं प्रभावोत्पादकं प्रयासमकरोत्। अपरञ्च रहस्यात्मकदृश्य-विधानेन साधारणजनस्याधिकं मनोरञ्जनं व्यधात्। अत एव एतन्नाटकस्य तदानीन्तने समाजे समादरोऽभवत्।

६. कीर्तिपताका

(महाराज शिवसिंह देवस्य विजय प्रशस्तिरूपा)

राज्यसिंहासनारूढे मिथिलामहीं प्रशासति महाराजशिवसिंहदेवे द्वित्राणि वर्षाणि यावत् मिथिलादेशोऽयं सुख-शान्ति-समृद्धिपरिपूर्णः, सारस्वतकार्य-संलग्न-विद्वत्तल्लजः, नित्यनैमित्तिककार्य-निरत-प्रजावर्गः, चिन्ता-व्यथा-विरतो व्यराजत। शान्तेऽस्मिन् वातावरणे महाकविरनवरतं सारस्वतकार्ये निरतः सन् १४०६ खीष्टाब्दात् पूर्वस्मिन्नेव सुसमये महाराजशिवसिंहस्य कीर्तिगाथारूपां **कीर्ति पताकाम्** विरचयांबभूव। विविधरागसुगुम्फितैः अवहट्टभाषा-निबद्धैरनेकैर्गीतैः संवलितायाः संस्कृतगद्य-पद्यात्मिकायाः कीर्तिपताकाया आरम्भे शिवसिंहस्य पितृव्यत्रिपुरसिंहस्यात्मजस्य अर्जुनरायस्य कीर्तिगाथा **हरिकेलि** नामिका विद्यते। अस्मिन् भागे शृङ्गाररस-निमग्नस्य कामकेलि-कलाङ्कितस्य अर्जुनसिंहस्य वर्णनं वर्तते।

विद्यापति-कृतायाः हरिकेलिस्वरूपायाः कीर्तिगाथायाः प्रारम्भात् प्रागपि भीष्मकविकृतः संक्षिप्तः काव्यस्याद्यांशः उपलभ्यते। तद्यथा

श्रीमहागणेशायनमः।

नित्यो विभुः पद-विलम्बि-जटान्तरस्थो

देहार्धबद्ध-रमणी-रमणीय-मूर्तिः।

कौतूहलादिव निकुञ्जगृहं निविष्टः

शृङ्गारवानवतु वो नवचन्द्रचूडः॥

अटन्ती कण्ठसंसक्ता रसशीकर-वर्णिनी।

भारती मालती-मालोपमेयं मे विराजताम्॥

निघ्नन्तं विघ्नानिह मधुलिह इव तारकर्ण-तालेन।

लम्बोदरमवलम्बे स्तम्बेरम-वदनमेकरदम्॥

एतदग्रे अवहट्टभाषानिबद्धेन अधस्तनपद्येन कीर्तिपताकाया अयमंशो भीष्म-(भीषम) कविना विरचितोऽस्तीति निश्चीयते—

पण्डिअ-मण्डलि बद्धगुणे, भीषमकीर मुहेन।

वाणी महुर महग्घरस, पिअउ सुअन स्रवणेन॥

[संस्कृतच्छाया—

पण्डितमण्डली-बद्धगुणेन भीष्मकीर-मुखेन।[१]

वाणी-मधुर-महार्घ-रसं पिबत सुजनाः श्रवणेन॥]

कीर्तिपताकाया आरम्भिकभागः खण्डित एवोपलभ्यते। मङ्गलश्लोकस्य निम्नांश एव प्राप्येत—

.....सदानन्द कन्दोऽयमिन्दुः॥

तदग्रे अवहट्टनिबद्धा मङ्गलात्मिकेयमार्यास्ति—

वन्दाइँ गणबइणो, पअ-कमलं सुप्पसन्न-हिअअस्स।

विहिण-विदारण-कारण-किअ-वारण-मुह-विसाल-दन्दस्स॥[२]

पणवओ गणबइ गाबओ गाहा।

---

१. कीर्तिपताकाया आद्यांशे श्लोकसंख्या ४।

२. वन्दे गणपतेः पद-कमलं सुप्रसन्नहृदयस्य।
विघ्न-विदारण-कारण-कृतवारण-मुख-विशालदन्तस्य॥ तत्रैव श्लो. सं. २

अज्जुनराअ-राअ भुअ-छाहा॥
संका छाड़ि वसओं तिरहुन्ती।
दिने दिने पहुगुणे बड्ढ़ु कित्ती॥[1]

कविमह नवजयदेव कवि, रसमह एहु सिङ्गार।
जगतसिंहरिपुराअमहु तीनिञु त्रिभुवन सार॥[2]

"राजार्जुनो गुरूः प्रभु-धर्मे" इत्यादि समुल्लेखात् कीर्तिपताकायाः कीर्तिगाथा (हरिकेलिः) इत्यंशः अर्जुन-रायस्य प्रशस्तौ महाकविना प्रणीतः।

शृङ्गाररसाप्लुते हरिकेलिरूपेऽस्मिन् भागे सुरतसुखमेव परमैश्वर्यसुखमिति कामपरायाणस्य अर्जुनरायस्य मनोऽनुकूलं कथयता कहाकविना वर्ण्यते-

सीता विश्लेषदुःखादिव रघुतनयो लब्धकृष्णावतारः
पूर्वं कृष्णो यथाभूदरिकुलदमनः साम्प्रतं तादृशस्त्वम्।
तस्माद् भूपालमौले! सुखमपि सुरतादेव देवानुभूयाः
संसारे भोगसारे स्फुटमवनिभुजा श्रीफलं वा किमन्यत्॥[3]

संसाररत्नं मृगशावकाक्षी रत्नं शृङ्गाररसो रसानाम्।
तच्चानुभूयाश्चिरमर्जुनेन्द्र! पुरानुभूतं मधुसूदनेन॥[4]

---

१. प्रणमामि गणपतिं गायामि गाथाम्।
अर्जुनराजराजस्य भुजच्छायायाम्॥
शङ्काँ छित्त्वा वसामि तीरभुक्तौ।
प्रतिदिनं प्रभुगुणैः वर्धयामि कीर्तीः॥ तत्रैव ३।

२. कविमध्ये नवजयदेवकविः रसमध्य एष शृङ्गारः।
जगत्सिंहो रिपुराजमध्ये, त्रयोऽपि त्रिभुवनस्य साराः॥ तत्रैव-४।

३. तत्रैव श्लोकसंख्या १३।

४. तत्रैव श्लोकसंख्या १४

एतत्प्रसङ्गे महाकविना या गद्यच्छटा प्रदर्शिता सापि सहृदयैर्द्रष्टव्या-

तद्यथा, रामेण रामजन्मनि सीता-विरह-दावानल-दग्धमानसेन, तत्खेदापनोदाय धृतकृष्णावतारेण गोपकुमारेण सानन्द-सुन्दरी-वृन्द-सहस्र-साहित्य-समुपजात-कुतुकेन, कदाचिदाकुलतां, कदाचित् पटुतां, कदाचिद् दृष्टिमालक्ष्य कृत-काम-क्रिडाभिलाषाभिश्चितव्रजसुन्दरीभिः कल-क्वणित-नूपुरारव-रमणीय-माधुर्य-मनोहराभिः, विविधभूषण-खचित-नानामणिविसर-वैचित्र्य-मनोहारिणीभिः शरच्चन्द्रमुखीभिः, पीनपयोधराक्रान्त-गुरु-नितम्ब-बिम्ब-भारोद्वहन- परिश्रम-मन्द-मन्थर-गामिनीभिः कामिनीभिः, कदाचित् स्वाधीनभर्तृकायाः, कदाचिदुत्कण्ठितायाः, कदाचित् कलहान्तरितायाः, कदाचिद् विप्रलब्धायाः, कदाचिद् विरणिण्याः, कदाचिदभिसारिकायाः, कदाचिद् वासकसज्जायाः, कदाचित् खण्डिताया, मण्डलानि गृहीत्वा सुमहाभागः खेलितः प्रेरितश्च[1]

प्रसङ्गमिमं विरामयता महाकविना अग्रे वर्ण्यते-

स्मित-रुचिरमुखीनां गोप-सीमन्तीनां

ललित-चलित-नेत्र-प्रान्त-लीला-विवृत्तैः ।

नव-कुवलय-वृष्टिं सर्वतस्तर्कयामः

स्मर-पूर-परिलग्न-भ्रूलता-चापसृष्टाम् ॥[2]

एवं हि कीर्तिपताकाया द्वितीय-तृतीय-विलासयोः विविधैर्गद्य-पद्य-गीतैरुद्दाम-शृङ्गारं वर्णयित्वा महाकविः चतुर्थविलासे महाराजशिवसिंहदेवस्य शौर्य-वीर्य-पराक्रम-विजयादि-प्रभूतां प्रसृत्वरीं कीर्तिं गायन् अवहट्टभाषायां विविधानि सुललितगीतानि प्रस्तौति, येषामयमाशयः-

१. कीर्तिपताकाद्वितीयोल्लासे-१५

२. तत्रैव १६ ।

शिवसिंहस्य संग्रामे गजयूथो दाम त्रोटयित्वा व्यूहं स्फोटयित्वा दुर्दान्तेन दन्तेन स्थाने स्थाने घातयति । वीरा गर्जन्ति । वाद्यानि वाद्यन्ते । स्वामिनः सज्जीभवन्ति विद्युदिव चापं संचिन्वन्ति मेघा इव बाणान् मुञ्चन्ति । भल्ला भल्लैः, मल्ला मल्लैः, खड्गाः खड्गैः, कुन्ताः कुन्तैः, अश्ववारा अश्ववारैः, पत्तयः पत्तिभिः युध्यन्ति । महाघोरं युद्धं भवति । पद्भ्यां पद्भ्याम् अग्रे गत्वा घातं हत्वा वीरो हृष्टो भवति । दन्तिनां दन्तेषु शुण्डेषु च मारयन्ति । खड्गधाराभिरग्निः प्रज्वलति । संग्राम-भूमौ फेरवी फेरंकरोति, मांसं खादं खादं प्रमत्ता भवति । अन्त्र-माला-बद्धो गृध्रः ऊर्द्धवमुड्डीय गच्छति । रक्त-मत्त-डाकिनी-प्रलाप-सङ्गे संगता भूता यावद् गायं गायं नृत्यन्ति, तावत् तामसेन प्रेता मुक्ता भवन्ति ।

अस्मिन् भयङ्करे महाघोरे संग्रामे प्रतिपक्षि-नायकः सुरतानः गज्ञनेश्वरः[१] नासिरूद्दीनमहमूदशाहः शिवसिंहदेवस्य पराक्रमेण चकितस्ततश्चलितः । प्रतिपक्षि-सैनिकाः सर्वे स्वरक्षायां संलग्ना बभूवुः । चतुरङ्ग-सज्जितम् सैन्यं ततश्चलिम् । श्वेतच्छत्राणि उद्गतानि । पाद-भरैर्महो चक्रं मन्ये, भग्नम् । ननु समुद्रजलं समुच्छलितम् । मूले सुमेरुरेव भग्नः ।

एवं हि संग्रामदिवसे तृतीयवेलायाम्- सुरत्राणीयाक्रमणावसरे महाराजाधिराजश्रीमच्छिवसिंहदेवानां पराक्रम-परीक्षा-कौतूहलं द्रष्टुं सुरवर्गः विमान-वेगं मन्दमकरोत् । यथा ऐरावतमारुह्य अन्तरिक्षे इन्द्रः स्थितः । महामांसस्य लोभे भूतगणः क्रीडति । शूराणां यात्रानुरोधेन सूर्यमण्डलं क्षीणम् । खेचरा हृष्यन्ति । सुरपुरः प्रहृष्यति । मेनका-रम्भा-घृताच्युर्वशीप्रभृतिविद्याधर्यः कुर्वन्ति शृङ्गारम्, यथा मनुजलोकः प्रत्यासन्नसंहारः ।[२]

एवं हि द्विसप्ततिमितेषु गीतेषु युद्ध-वर्णनं विधाय महाकविविद्यापतिर्ग्रन्थावसाने वर्णयति-

१. गाज़ियाबादस्य शासकः ।
२. तत्रैव तृतीयविलासे विंशतितमगद्यखण्डस्य संस्कृतच्छाया ।

एवं श्रीशिवसिंहदेवनृपतेः संग्रामजातं यशो
गायन्ति प्रतिपत्तनं प्रतिदिशं प्रत्यङ्गणं सुभ्रुवः।
एतत् कीर्तिपताकिका सुविदिता वाणी च विद्यापते-
राचन्द्रार्कमियं विराजतु मुखाम्भोजेषु भूयः सताम्॥

इति श्रीविद्यापतिविरचितायां कीर्तिपताकायां
चतुर्थो विलासः सम्पूर्णः॥

कीर्तिपताकायाः परिशीलनेन तदानीन्तने युद्धे प्रयुक्तानाम् अस्त्र-शस्त्राणाम्, युद्धशैलीनां, सेनानायक-बल-शौर्य-पाटवानाञ्च सम्यक्परिज्ञानं जायते।

७. लिखनावली

(व्याहारिकपत्रादिलेखनप्रकार-निर्देशिका)

कस्यात्यन्तं सुखमुपगतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण॥

महाराजशिवसिंहदेवस्य सम्यक् प्रशासनेन सुव्यवस्थिते राजतन्त्रे, प्रमोदा-मोद-संभृते प्रजाजने, गौडेश्वरस्य प्रबल-बल सुरत्राणस्य पराजयेन समधिगता-धिक-समुल्लासेन हर्षावहे समये मध्याह्नकालीनप्रचण्ड-मार्तण्डस्येव परितः प्रसरत् दृप्यत्-प्रतापस्य महाराजशिवसिंहदेवस्य प्रवर्धमानमुत्कर्षमसहमानः सनातन- धर्म-कर्मादि-व्यवस्थामसहिष्णुः जौनपुर-प्रशासकः इब्राहिमशाहः मिथिलाया अपि प्रभुर्बुभूषुः महता सैनिकबलेन प्रभूतोत्साहेन च मिथिलामभ्यषेणयत्। विपुल-सैन्य-बल-सनाथोऽपि दण्डनीति-विचक्षण-विलक्षण-बुद्धि-विभवशालिनो विद्यापतेः साहायकतामधिगतोऽपि एतत्संग्रामस्य परिणामं परिकल्पयन् अन्तः पुरस्यपरि-वारजनं सुहृद्वरेण कविवरेण सह नेपालतलवर्तिनः सप्तरीमण्डलस्य रजाबनौली-समाख्यग्रामे परमसखस्य द्रोणवार-वंशावतंसस्य नृपतिवरस्य गिरिनारायण-पुरादित्यस्य सविधे संप्रेष्य स्वयं महाराजः संघटित-सैन्य-बलः प्रति-

पक्षि-बलेन सह महता संरम्भेण युयुधे। किन्तु दैवदुर्विपाकात् मिथिलाजन-दौर्भाग्याच्च क्रमशः क्षीणबलः सन् हिमगिरि-गुहाश्रयं शिश्रिये।

पत्युरागमनं प्रतीक्षमाणा पतिधर्मपरायणा वेपमान-मानसा महाराज्ञी लखिमा-देवी कथंकथमपि प्राणान् धारयन्ती रजाबनौली-ग्राममध्युवास। महाकविविद्यापते-रपि सरसचित्तभूमिर्मरुभूमिरिव शुष्कतामगात्। महाकविरीदृशीं मनोभावानमभि लक्ष्य राजा पुरादित्यस्तत्रैव महाकविं लिखनावलीं[1] विरचयितुं निवेदयामास। यच्च ग्रन्थस्यास्य आरम्भिकपद्यमित्थं सूचयति—

सर्वादित्यतनूजस्य द्रोणवार- महीपतेः।

गिरिनारायणस्याज्ञां पुरादित्यस्य पालयन्॥

अल्पश्रुतोपदेशाय कौतुकाय बहुश्रुताम्।

विद्यापतिस्सतां प्रीत्यै करोति लिखनावलीम्॥

ग्रन्थान्तश्लोकश्चेदं विशेषतः प्रमाणयति-

जित्वा शत्रुकुलं तदीयवसुभिर्येनार्थिनस्तर्पिता

दोर्दर्प्याज्जितसप्तरी-जनपदे राज्यस्थितिः कारिता।

सङ्ग्रामेऽर्जुनभूपतिर्विनिहतो बन्धौ नृशंसायित-

स्तेनेयं लिखनावली नृपपुरादित्येन निर्मापिता॥

एवञ्च राज्ञः पुरादित्यस्य निदेशमासाद्य विद्यापतिः २९९ लश्मणाब्दे १४०८ खीष्टाब्दे ग्रन्थमिमं व्यरीरचत्।

सम्बोध्य जनस्य भेदेन विषयानुरोधेन च पत्र-लेख-क्रमे भेदो भवतीति सूचयन् कथयति महाकविः

---

१. लिखनावलीति लिखनानाम्-लेखानाम्-आवली-श्रेणी-लिखनावली। अत्र लिखनशब्दः लिख्यते इति लिखतेः कर्मणि घञि लेख शब्दार्थे प्रयुक्तो देश्यशब्दः

उच्चैः कक्षमधः कक्षं समकक्षं नरं प्रति।
नियमे व्यवहारे च लिख्यते लिखन-क्रमः ॥[१]

एवञ्च विविधेषु कक्षेषु उच्चकक्षे अष्टादशपत्राणि, समकक्षे सप्तपत्राणि, अधः कक्षे अष्टाविंशतिः तथा सामान्य-व्यवहारोपयोगीनि एकत्रिंशत् पत्राणि विलसन्ति । संकलनेन सर्वाणि ८४ पत्राणि ग्रन्थेऽस्मिन् सन्ति ।

अत्र एकैककक्षस्य आदर्शरूपमेकं पत्रमुपन्यस्यते । तत्र

उच्चैः कक्षं प्रति—

स्वस्ति । प्रचण्ड-प्रताप-प्रभातिरस्कृत-रिपु-तिमिर-सङ्घात-महामहोत्सवेषु दया-दान-दांक्षिण्य-मर्यादा-विवेकादि-सकल-राजगुणालङ्कृतेषु वसु-वितरण-कथा कनिष्ठीकृत-बलि-कर्ण-प्रभृति-वदान्यचक्रेषु वसुन्धरा-शक्रेषु निज-निखिल-विरुदावली-विराजमान-महाराजाधिराज-श्रीमदमुकदेव-चरणयुगलेषु संग्राम-शतविजयिषु अमुकस्थानात् रौतपति[२] श्री-अमुकस्य सिंहासनतल-कृतशिरसः प्रणाम-शतपत्रीयम् । श्रीमच्चरणानां प्रतापोदयात् कुशलमत्र । विशेषतस्तु समागत-स्वहस्तपत्रं शिरसि निधाय सम्यक् समधिगतार्थं कृतवानस्मि । उज्जटभूमि-वासार्थं यदादिष्टं तच्छ्रीमद्देवपादानां प्रभुधर्मं श्रुत्वा विदेशादागत्य लोकाः स्वयमेव वसन्तस्सन्ति । लोकास्तु यत्रैव परिपाल[३] पश्यन्ति, यत्र च प्रभुधर्म्म-स्थेयताञ्च तत्रैव वसन्ति । तेन देशे वासोवृत्त इति गोचरितम् । ये चात्र प्रव्यूहमाचरन्तो दृष्टास्ते दुर्वृत्त-मारणे च मम कौशलमात्रं, प्रतापस्तु श्रीमद्देवपादानामेव क्रियासाधकः । किं बहुनेति[४]

---

१. लीखनावली श्लोकसंख्या-४ ।

२. रौत-रौत्त-राउत्त-रावत-सरदार इति भाषायाम् ।

३. परिपालम्-परिपालनम्-जातस्य परिपालनम्-मनुः ९-२७ ।
अर्थात् रक्षणम्-भरणम्-पोषणम्-संवर्धनम् ।

४. लिखनावली-पत्र-संख्या-१० ।

अधःकक्षं प्रति-

स्वस्ति। अमुकपत्तनात् दण्डपाट-मुकुट-सिंहासन-श्वेतातपत्र-सित चामरेत्यादि-समस्त-प्रक्रिया-विराजमान-नृपति-मुकुट-माणिक्य-किरणारुण-नखमयूख-रिपुराज-द्विरद-पञ्चानन-निजकीर्ति- कौमुदी-बोधित-कुमुद-काननेत्यादि-महाराजाधिराज-श्रीमदमुकदेव-पादाः समर-विजयिनः परमावदातचरितान् राजश्री-अमुकान् संवादयन्ति। सम्प्रति यूयं करिष्यमाण-क्रियमाण-क्रमेण सेवां न कुरुथ, दीयमानक्रमेण करन्न दत्थ, नैरपेक्षमाचरथ। किमिदं साम्प्रतमपि यदि स्वहित- मिच्छथ, तदा प्रत्यब्ददीयमानकरं श्रीकरणे प्रविष्टं करिष्यथ, सेवार्थं स्वकीयपुत्रं भ्रातरं वा समुचितसैन्यसमेतं प्रहेष्यथ। यद्येवं न कुरुथ, तदा यत्र जीवथ, तत्र यास्यथ। नो चेत् प्रयाणं कृत्वा करि-तुरग-पदाति-पदाघातैरेव युष्माकं दुर्गं चूर्णावशेषीकृत्य युष्मान् सुभट- कोटि-शर-व्यापारै-रचिरादेव यमपुरं प्रहेष्याम इति।[१]

समकक्षं प्रति-

स्वस्ति। यशः कर्पूर- पराग-पूरिताशेष-दिङ्मण्डला-खिल-धरणि-वलयेषु इष्टापूर्त-मण्डितारोष-मेदिनी-चक्रेषु सत्यव्रत-पालन-युधिष्ठिरेषु समस्त-प्रक्रिया-विराजमान-महाराज-श्री-अमुकदेवसिंहेषु संग्राम-शत-विजयिषु अमुकग्रामात् श्री-अमुकराजस्य प्रेमपत्रीयम्। कुशलमत्र, स्वेषाञ्च सवाहिनी-परिवाराणां कुशलोदन्तेन वयमानन्दनीयाः। विज्ञापनञ्च आवयो-मैत्री पूर्वस्माद् दिवासानुवर्तमाना तथैव विद्यते, यथास्मदीये कोषे जनपदे अन्येषु च श्रीमतामायत्तिरस्ति। तत्रश्रीमतां विदितं यवनेश्वर-प्रहिता सेना भवद्भूमिं पराभवितुं निकटभागतास्ति। ततो यदस्माकमायत्तं श्रीमतामनुकूलं तदर्थमस्मासु लेखनीयम्। सतां मैत्री प्रस्तावे प्रयोजिकैव भवति। यदि यवनेश्वरेण समं सन्धिर्विधीयते, तदा वयं धनमौपायन-वस्तूनि प्रस्थापयामः। यदा युद्धमारभ्येत, तदा सेनां प्रस्थापयामः। स्वयञ्च निकटमागत्य यदर्हति तत्कुर्मः। किं बहुनेति। बहिर्नाम लिखनम्।[२]

१: तत्रैव पत्र संख्या-१९

२. तत्रैव पत्र संख्या- ४७।

अधस्तनमेकं व्यवहार-पत्रमपि आदर्शरूपमुपन्यस्यते—सिद्धिः। ल.सं. २९९ माघवदि ५ बुधे अमुकग्रामे प्रतिहस्तक[1]-महामहोपाध्याय-श्री-अमुक शर्मभिः सपरिषद्भिः अर्थि-ब्राह्मण-श्रीदेवदत्त-प्रत्यर्थि-राउत्त-श्रीजयदत्तयोः ऋण-विषयक-विवादे मम पितुः पुराणशतमेकं कपद्र्दकं कला-व्यवस्थया अतीतपञ्चम-वर्षे प्रत्यर्थिना ऋणत्वेन प्रगृहीतं, तदिदानीं सोऽयं ददात्विति अर्थिना भाषायां कृतायां मया तद्धनं गृहीतम्। किन्तु तत् सर्वं मया कला-समेतमर्थि-पितरि प्रत्यर्पितमिति प्रत्यर्थिनोत्तरिते भाषोत्तरे परामृश्य विचारे प्रारब्धे, करणोत्तर-प्रत्यर्थिदिशि अनुसन्धाने अमुकामुकामुकशर्माणः त्रयः साक्षिणः प्रत्यर्थिनोपन्यस्ताः अर्थिना स्वीकृताश्च। तैः साक्षिभिर्व्यवस्थापित-निगददिने समागत्य सत्यपुरस्सरं निगदनात् प्रत्यर्थिना पूर्वगृहीत- कपद्र्दकं पुराणशतमेकं सोदय[2] दत्त्वा निस्तीर्णमिति सत्यम्।

यस्योचुः साक्षिणः सत्यां प्रतिज्ञां विजयी भवेत्।

अन्यथा वादिनो यस्य भवेत्तस्य पराजयः॥

इत्यर्थिनः पराजय इत्यवधार्य प्रत्यर्थि-श्री-अमुकाय जयपत्रमिदं दत्तमिति[3]

एवं हि संस्कृतभाषा-निबद्धानि एतानि पत्राणि सूचयन्ति यद् विद्यापति-युगीन-मिथिलायाम् पत्र- व्यवहाराः संस्कृतभाषयैव भवन्ति स्म। संस्कृतभाषैव लोक-व्यवहार-कार्ये प्रचलिताऽऽसीत्।

एषा हि "लिखनावली" मिथिलायास्तद्युगीनमादर्शं, तत्कालीनां राजनैतिकीम्, आर्थिकीम्, धार्मिकीञ्च स्थितिम्, कृषि-व्यवस्थाम्, व्यापार-पद्धतिम्, राज्यस्य आय-व्यवस्थाम्, अपराधमपाकर्तुं न्याय-दण्ड-व्यवस्थाञ्च सम्यक् प्रदर्शयति।

१. ऋणादेर्निर्णायकः परिषदो मुख्यः प्रतिहस्तक उच्यते।

२. सव्याजमित्यर्थः।

३. तत्रैव पत्र-संख्या- ५४।

रजाबनौली-ग्रामे निवसन्नेन अध्यात्म-पथ-पथिकोऽयं मनीषी महाकविः श्रीमद्भागवतमहापुराणं सम्पूर्णं व्यलेखीत्। १४१८ खीष्टाब्दे एतस्य लेखनं स समाप्नोत्। एतत्-पाण्डुलिपिः कामेश्वरसिंह दरमङ्गा संस्कृत-विश्वविद्यालय-पुस्तकालये सुरक्षितास्ति। भारत-सर्वकारस्य पत्रालय-संविभागेन डाक-टिकट-प्रकाशन-परम्परायाम् एतस्याः पाण्डुलिपेरन्तिमांशं "विद्यापतेर्लिपिरियम्" इत्यादाय एकं डाक-टिकटमपि प्राकाशयत्। एतेन विद्यापतेर्लिपेरपूर्वं महत्त्वं सूच्यते।

८. शैवसर्वस्वसारः

(शिवपूजा-विधिविधानात्मकः)

शिवसिंहदेवमन्तर्हितं विज्ञाय यवन-शासकः तद्भ्रातरं पद्मसिंहमाहूय मिथिलाराज्यशासनं कर्तुमादिदेश। गत्यन्तरमपश्यन् सचेताः पद्मसिंहस्तदादेशं तथैवाङ्गीकृत्य राज्याधिकारिणीं ज्येष्ठां भ्रातृपत्नीं लाखिमादेवीं सर्वं निवेद्य तदादेशेन राज्यभारमुवाह।

द्वादशवर्षाणि यावत् पत्युरागमनं प्रतीक्ष्य शास्त्र-विधिना निर्मित-कुशपर्ण-नरदेहे अग्निसंस्कारं विधाय स्वयं पतिमनुजगाम। ततः १४१८ खोष्टाब्दे पद्मसिंहः राज्यसिंहसानमारुह्य वर्षद्वयमात्रं शासनं विधाय परलोकं जगाम। ततस्तस्य धर्म-पत्नी विश्वासदेवी १४२० खीष्टाब्दे राज्यसिंहासनस्था महाराज्ञी बभूव। सा च पुनर्महाकविविद्यापतिं विनिवेद्य लेखनकर्मणि नियोजयामास।

तदाज्ञयैव शिवभक्तो महाकविः शैवकर्मकाण्डात्मकं शैवसर्वस्वसार-नामानं ग्रन्थं निबबन्ध। एतच्च प्रमाणयति ग्रन्थस्य आदिमो भागः।

तद्यथा-

सूर्याचन्द्रमसौ दृशौ तदुपरि ज्योतिर्मयं दर्शनं
बिभ्राणो गणयन्निव स्वमनघं विश्वैकबीजं विभुः।

धत्ते यः शिरसा सुधाकर-कलामेकाङ्कमुद्रामयीं

देयादभ्युदयं त्रिकालविदयं देवो भवानी-पतिः ॥

इत्थं मङ्गलाचरणं विधाय पद्मसिंह पितामहं महाराज-भवसिंहं कीर्तयन् वर्णयति महाकविः-

गङ्गोत्तुङ्ग- तरङ्ग-सङ्गम-लसत्कीर्तिच्छटा- क्षालित-

क्षोणि-क्ष्मातल-सर्व-पर्वत-वरो वीर-व्रतालंकृतः ।

भूपालावालिमौलि-मण्डल-मणि-प्रत्यर्च्चिताङ्घ्रिद्वया-

म्भोज-श्रीभवसिंहभूपतिरभूत् सर्वार्थि-कल्पद्रुमः ॥

ततश्च नय-विनय-दया दान-दाक्षिण्य-दक्षस्य भवसिंहतनूजस्य देवसिंहस्य अधस्तनपद्येन प्रशस्तिं विशदयति-

दृप्यद्-दुर्व्वार-वैरि-द्विप-कुल-दलनाकुण्ठकण्ठीरवश्री-.

रासीमाशेषभूभृन्मणिमुकुट-तट-ज्योतिरुद्योतिताङ्घ्रिः ।

तत्सूनुः पुण्यकीर्तिर्नय- विनय-दया-दान-दाक्षिण्य-दक्षो-

वृक्षः सर्वाश्रितानां मिथिलभुविनृपो देवसिंहो बभूव ॥

दत्तं येन द्विजेभ्यो द्विरद-रथ-महादानमन्यैरशक्यं

का वार्ता त्वन्यदाने कनकमयतुला पूरुषो येन दत्तः ।

यस्य क्रीडा-तडागस्तुलयति सततं शासने वारि-राशिं

देवोऽसौ देवसिंहः क्षितिपतितिलकः कस्य नासीन्नमस्यः ॥

ततश्च प्रद्येनैकेन देवसिंहात्मजस्य प्रियवयस्यस्य शिवसिंहदेवस्य कीर्तिलतां पल्लवयति-

क्षोणीभर्तुरमुष्य वैरि- वनिता-वैधव्य-दीक्षागुरो-

रुद्भूतः शिवसिंहदेवनृपतिर्वंशावतंसः सुतः ।
शौर्यावर्ज्जित-गौड-तर्जन-महीपालेश-नम्रीकृता-
नेकोत्तुङ्ग-मतङ्गजाश्व-कनकच्छत्राभिमानोदयः ॥

ततश्चात्यल्पकालमपि मिथिलां प्रशासतः विपुलदानेन तुच्छीकृत-कल्प-वृक्षस्य दया-दाक्षिण्यादि-गुण-विशिष्टस्य पद्मसिंहस्य महिमानं वर्णयति-

संग्रामाङ्गण-सीम-भीम-सदृशस्तस्यानुजन्माभवद्-
दान-स्वल्पित-कल्पवृक्ष-महिमाऽसौ पद्मसिंहो नृपः ।
कैलासोदर सोदरीयति शरद्राका शशाङ्कीयति
प्रालेयाचलशेखरीयति यशो यस्यारविन्दीयति ॥
विद्यामङ्गिरसः सुतस्य विनयं रामस्य वृत्तं मुनेः
शौर्यं सूर्यसुतस्य धैर्यमवनेर्गाम्भीर्यमम्भोनिधेः ।
दानं दानवनन्दनस्य सकलं सारं समुच्चिन्वता
धात्रा यः शरदिन्दु-सुन्दर-यशाः क्षोणीपतिर्निर्मितः ॥

ततश्च धर्मकर्मैकसीमायाः सीमन्तिनीवरायाः पद्मसिंहप्रेयस्या विश्वासदेव्या गुणगण-गरिमाणं प्रदर्शयते महाकविरधस्तनपद्य-कदम्बेन—

दुग्धाम्भोधाविव श्रीगुण-गण-सदृशे विश्वविख्यात-वंशे
संभूता पद्मसिंह- क्षितिपतिदयिता धर्मकर्मैकसीमा ।
पत्युः सिंहासनस्था पृथु-मिथिलामही-मण्डलं पालयन्ती
श्रीमद्विश्वासदेवी जगति विजयते चर्ययाऽरुन्धतीव ॥
इन्द्रस्येव शची समुज्ज्वलगुणा गौरीव गौरीपतेः
कामस्येव रतिः स्वभावमधुरा सीतेव रामस्य या ।

विष्णोः श्रीरिव पद्मसिंहनृपतेरेषा परा प्रेयसी
विश्वख्यांतनया द्विजेन्द्रतनया जागर्ति भूमण्डले ॥

विश्वासदेव्या दान-महादानादि-विख्यात-ख्याते वर्णनं विदधत् प्रस्तौति महाकविः—

दातारः कति नाभवन् कति न वा सन्तीह भूमण्डले
नैकोऽपि प्रथितप्रदानयशसो विश्वासदेव्याः समः ।
यस्य स्वर्णतुला मुरवानिल- महादान-प्रदानोत्सवः
स्वर्णैरर्थि-मृगीदृशामपि तुलाकोटि-ध्वनिः श्रूयते ॥

महाराज्याऽनया खानितस्य विशालस्यैकस्य तडागस्य वैशिष्ट्यं काव्य-कौशलेन विशदयन् महाकविरधस्तन पद्येन कामप्यपूर्वां विच्छित्तिं प्रकाशयति—

लीला लोला वलाली-कुच-निचय-दलद् वीचि-विस्तार-तार-
प्रव्यक्तोन्मुक्त-मुक्ता-तरलतर-तरद् बिन्दु-सन्दोह-बाहुः ।
पुष्यत् पुष्पौघ-माला-कुल-कलित-लसद् भृङ्गसङ्गीत-सङ्गी
श्रीमद्विश्वासदेव्याः समरुचि-रुचिरो विश्वभागस्तडागः ॥

एवं हि विविधविशिष्टगुणगणालंकृताया महाराज्या विश्वासदेव्या अनुज्ञामवाप्य महाकविः "शैवसर्वस्वसारं"ग्रन्थं ग्रथ्नाति स्म ।

नित्यन्देव- द्विजार्च्चा-द्रविण-वितरणारम्भ-संभावितश्री-
धर्मज्ञा चन्द्रचूड-प्रतिदिवस-समाराधनैकाग्रचित्ता ।
विज्ञानुज्ञाप्य विद्यापतिकृतिनमसौ विश्वविख्यातकीर्तिः
श्रीमद्विश्वासदेवी विरचयति शिवं शैवसर्वस्वसारम् ॥[१]

१. शैवसर्वस्वसार- श्लोकसंख्या-१-१२ ।

प्रकृतरचना-विषये साभिनिवेशं निगदति महाकविः यत् कल्पलतेव अभीष्ट-फलदा शैवसर्वस्वसाररूपेयं शिवशङ्करस्य वाक्यावली विद्यते, यस्याः पुराणादि-वचन-प्रमाणं मूलम्, या च विविधपुरुषार्थरूपनवकिशलयैः समृद्धा, यत्र च पुष्पिका वाक्यरूपाणि मनोहराणि पुष्पाणि, अर्थवादरूपरम्याणि फलानि च विलसन्ति । तथा हि—

प्रमाण-मूला नवपल्लवाढ्या
सुपुष्पिका रम्यफलोपपन्ना ।
अभीष्टसिद्ध्यै विबुधैरुपेया
वाक्यावली कल्पलतेव शम्भोः ॥[१]

ग्रन्थेऽस्मिन् निबन्धा महाकविः शिव-माहात्म्यम्, हरिहराद्वैतम्, शिव-भक्त-लक्षण-निरूपणपूर्वक- शिवभक्ति-माहात्म्यम्, अधिकारि- स्वरूपम्, शिवस्य स्मर-ण-कीर्तन-दर्शन-स्पर्शन-शिवमन्दिरसम्मार्जन-शिवायतन-लेपन-निर्माल्यापनय-नादि-समुपासनजन्यफलानि विशदं समवर्णयत् ।

ततश्च पयो-दधि-घृत-मधु-सर्वौषधि-पञ्चगव्येक्षुरस- सुवासिततैल-सच-न्दन-सलिल-पुष्पोदक-कर्पूरागुरूमिश्रितजल-शीतलोदक-सितभस्म-कुशोदका-दिभिः समनुष्ठितस्य शिव-स्नपनस्य फलं सम्यक् प्रतिपाद्य शिवप्रीतिकामनया समनुष्ठितानां गीत-वादित्र-मुख-वाद्यानां फलविशेषम्, अग्निहोत्र-सस्वर-वेदपाठ-यज्ञानुष्ठानादि-जन्य-फलस्य तुलनायां शिवार्चन-लभ्य-फलस्य आधिक्यम्, कृष्णाष्टमी- कृष्णचतुर्दशीत्यादि-पर्व-विशेषेषु पयो-दधि-घृत-विशिष्टपुष्प-शालि-तण्डुलसाधितचरु-प्रभृति-द्रव्यैः शिवाराधनस्य विशिष्टफलम्, पूजानन्तर-वामदेव-गानफलं, शैलेन्द्रनील-सुवर्ण-रजत-पित्तल-कांस्य-मृत्तिका-गुड-शर्करा-घटित-नवनीत-मय-लवणमय-स्फटिक-रत्नमय-ताम्रमय-प्रवाल-मौक्तिक-कृष्णास्य- त्रपु-षांय-सत्रैलोहिक-वज्रलोह-वार्क्षादि-शिवलिङ्ग-पूजन-विशेषफलम्, अर्धपात्र-परि-माण-प्रतिपादनपूर्वकं गन्ध-पुष्प-फल-जल-पञ्चगव्यादि-पदार्थ-संभृतैः विविध-

१. तत्रैव श्लोकसंख्या-१३

द्रव्य-घटितैस्तैस्तैरर्घ्यपात्रैः शिवार्चनस्य विशिष्टफलम्, साज्य-गुग्गुलु-कालागुरु-देवदारु-कर्पूर-श्रीखण्ड-धूपादि-समर्पणस्य विशेषफलम्, विविधप्रकारेण विविध-विधदीपदानस्य, द्रव्य-विशेष-सम्भृत-नैवेद्य-समर्पणस्य, सौवर्णाभरण-वसन-यज्ञो-पवीत-दर्पण-मायूर-व्यजन-तालवृन्त-चामरच्छत्र-भेरी-मृदङ्ग-धेनु-वृषभ-भूमि-ग्राम-दास-दासी-घण्टा-वितान-महाध्वज-ध्वजमाला-मौलिकमण्डप-दोला-शिवमूर्ति-प्रभृतीनाम् पदार्थानां प्रदानेन फलातिशयप्राप्तिं च विस्तरेण निरूपयामास ।

ततश्च जपस्य प्रणामस्य नीराजनस्य प्रदक्षिणस्य रूद्राक्षधारणस्य शिवलिङ्ग-प्रतिष्ठापनस्य च विशिष्टानि फलानि निगद्य शिवार्चने विहिताविहित-पुष्पाणां समुल्लेखं विधाय शिव-व्रत-फलञ्चाभिधाय शिवपूजने विधि-निषेधौ निरूप्य प्रसङ्गतया अन्यानपि विविधान् विषयान् प्रतिपादयामास ।

[१]ततश्च नारदपुराणोक्तं शिवोद्देश्यकं जयाशंसनं समुल्लिख्य पुनरन्ते स्वाभीष्टं हरिहराद्वैतं पद्येनानेन वर्णयाञ्चकार-

स्वस्त्यस्तु व स्तुहिन-रश्मि-भृतः प्रसादा-
देकं वपुः श्रितवतो हरिणा समेत्य।
तन्नाभि-पङ्कज-सहोत्थ-मृणाललीला-
माविष्करोति हृदि यस्य भुजङ्गराजः ॥

ग्रन्थान्ते च विश्वासदेव्या कारितस्य शैवसर्वस्वसार-ग्रन्थस्य कल्पान्तस्थायि यशः संकीर्तयति महाकविः—

यावद् गङ्गा विभाति त्रिपुरहरजटामण्डलं मण्डयन्ती
यावन्माला सुमेरोः शिरसि सितमहावैजयन्ती जयन्ती।

१. जयेश्वर महादेव जय भूतपते हर ।
जय शेष महावाहो मोचय त्रिपुरान्तक ॥
—विहित-विविधमूर्ते भूय एवन्नमस्ते ॥ तत्रैव श्लोकसंख्या १०४१-१०४३ ।

यावत् पातालमूलं स्फूरदमलरुचिः शेषनिर्मोकवल्ली
तावद् विश्वासदेव्या जगति विजयतां शैवसर्वस्वकीर्तिः ॥

समस्त-प्रक्रिया-विराजमान-महामहादेवी-श्रीमद्विश्वासदेवी- (निदेशेन) विरचितं शैवसर्वस्वं सम्पूर्णम् ।

एवं हि शिवार्चन-विषयकोऽयं प्रकृत-ग्रन्थः भक्तशिरोमणेर्महाकवि-विद्यापतेर्भाव-प्रवण-मानसं नितरां प्रकाशयतीति शम् ।

९. शैवसर्वस्वसार-प्रमाणभूत-पुराण-सङ्ग्रहः

शैवसर्वस्वसार-ग्रन्थ-प्रणयन-समये एव निगमागम-पुराण-परिशीलन-चुञ्चुना विद्यापतिना शैवसर्वस्वसार-प्रमाणभूत-पुराण-सङ्ग्रहात्मकोऽयमपि ग्रन्थो निबद्धः । अतः शैवसर्वस्वसारे प्रतिपादितानां समेषां विषयाणां प्रमाणभूतानि वचनानि निगमागम-संमतानि इतिहास-पुराणेभ्योऽत्र संगृहीतानि सन्ति यानि शिवाराधन-सम्बद्धानि एकोनशतत्रयमितानि ज्ञातव्य-वस्तूनि विषयीकुर्वन्ति ।

ग्रन्थेऽस्मिन् आगम-कल्प-रामायण-महाभारत-लिङ्ग-वायु-कूर्म-ब्रह्म-मत्स्य-ब्रह्मवैवर्त-भविष्य-स्कन्द-विष्णु-नारद-वराह-हरिवंश-शिव-शिवधर्म-शिवरहस्य-कालिकादिनानापुराणोपपुराणानां गौतम-याज्ञवल्क्य-दक्ष-हारीत-स्मृति-हयशीर्ष-पञ्चरात्रादीनाञ्च वचनानि प्रमाणत्वेन संगृह्य शैवसर्वस्वसारे निरूपित-विषयाणां प्रपाणमूलकत्वं प्रदर्शयाञ्चक्रे । एतेन विद्यापतेः श्रुति-स्मृति-पुराणेतिहासादीनां गम्भीराध्ययनजन्य-नैपुण्यं साधु परिलक्षितं भवति ।

१०. गङ्गावाक्यावली

(गङ्गाविषयक-भक्ति-भावोपासनात्मिका)

महाराज्ञी-विश्वासदेवी-निदेशमासाद्य महाकविः १४२५ खीष्टब्द-समीपवर्तिनि समये गङ्गावाक्यावलीति नाम्ना विख्यातं ग्रन्थरत्नं स्वकीय-ग्रन्थमालायां सूत्रयाञ्चकार । एतच्च प्रमाणयति अधस्तनग्रन्थ-समापनपद्यम्—

यावद् गङ्गा विभाति त्रिपुरहर-जटामण्डलं मण्डयन्ती

मल्लीमाला सुमेरोश्शिरसि सितमहावैजयन्ती जयन्ती।

याता पातालमूलं स्फुरदमलरुचिश्शेषनिर्मोकवल्ली

तावद् विश्वासदेव्या जगति विजयतां गाङ्गवाक्यावलीयम्॥

ग्रन्थारम्भे मङ्गलमाचरन् निगदति महाकविः यद् गाङ्गं वारि द्रवीभूतम् ईश्वरीयं रूपम्, समस्तदेवानां पुञ्जीभूतं तेजः तथा व्यक्तीभूतब्रह्म एव विद्यते। तथा हि—

रूपं साक्षात् प्राप्तमैशं द्रवत्वम्

पुञ्जीभूतं सर्वगीर्वाणतेजः।

व्यक्तीभूतं ब्रह्मविघ्नं निहन्या-

दारम्भेऽस्मिन् गाङ्गमम्भो मदीयम्॥

द्रवीभूतो धर्म एव[१] गङ्गारूपेण परिणमते। भगीरथतपःप्रभवादानीता इयमेव मन्दाकिनी वियद्गङ्गा भागीरथी अमृतस्वरूपया वारिधारया भारतधरां पावयन्ती आदिकालादेव आदिकवि-वाल्मीकि-व्यासादिमहर्षिभिर्नुता स्तुता च सकल-कलि-कलुषापहारिकारूपेण वर्णितास्ति।

महाकविर्विद्यापतिरपि साक्षाद् धर्मस्वरूपाम् अशेषतीर्थमयीम्, अष्टाविंशति कोटिपरिमितसकल-देवमयीम्, अभीष्टवरदाम्, सर्वोत्कृष्टाम् पुण्यसलिलां शरणा-गत-वत्सलां भागीरथीं गङ्गां द्रवीभूतान्तःकरणेन भाव-प्रवणया भक्त्या च भजते इति प्रकाशयति गङ्गावाक्यावलीति नाम्ना प्रथितो ग्रन्थः।

---

१. धर्मस्तु द्रवरूपेण ब्रह्मणा निर्मितः पुरा।
तद्वै गङ्गेति विख्याता त्रिषु लोकेषु विश्रुता॥ वाराहपुराणे।

ग्रन्थेऽस्मिन् भगवत्या भागीरथ्या गङ्गाया माहात्म्य-**श्रवणम्**, नाम**संकीर्तनम्**, पुण्यनाम-**स्मरणम्**, पावनतीर-**सेवनम्**, पवित्रजल-**स्पर्शनम्**, आधिदैविकचरण-**वन्दनम्**, आराध्यमूर्ते**र्दास्यम्**, चरणामृत**पानम्**, मुक्त्यर्थ**मात्मनिवेदनञ्चेति** नवधापि भक्तिर्महाकवेर्दरीदृश्यते ।

भारते प्रवहन्तीनां नदीनां गङ्गायाः श्रेष्ठत्वम्, गङ्गाद्वारे स्नानेन विश्वजिद्यज्ञ-लभ्य-पुण्यस्य फलम्, गङ्गास्नान-विधानम्, तत्रानुष्ठेयकृत्यानां प्रतिपादनम्, गङ्गा-तीर- वर्ति-तीर्थेषु नित्य-नैमित्तिक-काम्य-कर्मणामनुष्ठानेन फलाधिक्य-वर्णनम्, गङ्गासागर-सङ्गमे स्नानस्य अपूर्वमाहात्म्यम्, इत्येवंविधा अन्येऽपि अनेके विषया महाकविना वर्णिता ग्रन्थस्यास्य किमप्यपूर्वं महत्वमुपयोगित्वञ्च प्रकटयन्ति ।

यथा हि गङ्गालहर्यां भागीरथीं भावयतो भावुकस्य कवे र्भावना वरीवर्ति तथैवमहाकवेरपि भागीरथी भाव-भक्तिर्दरीदृश्यते-

मातः ! शैलसुता सपत्नि ! वसुधाशृङ्गार-हारावलि !
स्वर्गारोहणवैजयन्ति ! भवतीं भागीरथि ! प्रार्थये ।
त्वत्तीरे वसतस्त्वदम्बु पिबतस्त्वद्वीचि प्रेङ्खोलत
स्त्वन्नाम स्मरतस्त्वदर्पितदृशः स्यान्मे शरीर-व्ययः ।

अत एव निरन्तर-गङ्गाभक्ति-भावना-भावितहृदयस्य महाकवेर्विद्यापते-र्हार्दिक-प्रार्थनया द्रवीभूता भक्तवत्सला भगवती भागीरथी स्वयमेव तज्जीवनाव-सान-समये तदन्तिकमागत्य वत्सं क्रोडीकृत्य तस्य भक्ति-माहात्म्यं प्रकटयामासेति शम् ।

११. विभाग-सारः

(दायभाग-निरूपणात्मकः)

महाराजशिवसिंह-पद्मसिंहयोरनपत्यतया महाराज्ञ्या विश्वासदेव्या अमरपुर-गमनानन्तरम् १४३२ खीष्टाब्दे भवसिंहस्य द्वितीयतनयस्य (देवसिंहानुजस्य) हरि-

सिंहस्य तनुजन्मा दर्पनारायणेतिनाम्ना प्रथितः नरसिंहः मिथिलाराज्य- सिंहासनमारुरोह। अस्यैव राज्ञो निदेशमासाद्य महाकविः दायभाग-व्यवस्थापनपरं विभाग-सारनामानं ग्रन्थं निबबन्ध। एतच्च सूचयति ग्रन्थस्य आदिमभागस्याधस्तनं पद्यम्—

राज्ञो भवेशाद्धरिसिंह आसीत्
तत्सूनुना दर्पपरायणेन।
राज्ञा नियुक्तोऽत्र विभाग सारं
विचार्य विद्यापतिरातनोति॥

प्रथित-प्रतापस्य अर्थिनां कृते कल्पद्रुमायितस्य मिथिलामहीमण्डलाखण्डलस्य दर्पनारायणस्यास्य गुण-गरिमाणं प्रथयति महाकविरधस्तनश्लोके-

अस्ति श्रीनरसिंहदेव मिथिला-भूमण्डलाखडुलो-
भूभृन्मौलि-किरीटरत्न-निकर-प्रत्यर्चिताङ्घ्रिद्वयः।
आपूर्वापर-दक्षिणोत्तर-गिरि-प्राप्तार्थि-वाञ्छाधिक-
स्वर्णक्षौणि-मणि-प्रदान-विजित-श्रीकर्ण-कल्पद्रुमः॥

ग्रन्थादौ महाकवेर्मङ्गलश्लोकः प्रतिपाद्यविषयं सम्पद्विभाग-जन्य-विवादपद-विनिर्णयं महता कौशलेन संकेतयन् कामप्यपूर्वां विच्छित्तिमभिव्यनक्ति-

गङ्गमेऽसौ ममापि प्रथय कथमहो वैष्णवीति प्रसिद्धेः
किं नाम्ना मेऽस्ति भोगः स तु भवतु तथा भेदभाजः प्रमाणम्।
भिन्नोऽहं कोऽत्र साक्षी विधिरिति विधिना सस्मितं वीक्ष्यमाणौ
पायास्तां निर्विवादौ सपदि हरिहरौ व्यङ्ग्यमात्रोत्तरान्नः॥

ततो नारदमतमुपन्यसन् दायभाग-पदार्थं निरूपयति-

विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते।

दायभाग इति प्रोक्तं तद्विभाग-पदं बुधैः ॥[1]

ततश्च-

१. दायभागात्मक-धनविभागः,

२. मृतपितृकधनविभागः,

३. जीवितपितृक-धनविभागः,

४. भागानर्हस्य विचारः,

५. (पित्र्यरिक्थ-विभागकाले पुत्रस्य उपनयने कन्यायाश्च पाणिग्रहणे असम्पन्ने सति ज्येष्ठेन भ्रात्रा अविभक्तेन धनेन एतयोः संस्कारः कर्तव्य इत्यादिरूपस्य) असंस्कृतसंस्कारस्य विचारः,

६. विभाज्य रिक्थस्य अविभाज्य-रिक्थस्य च विचारः,

७. विद्याविहीनपुरुषैः कृष्यादिना समुपार्जितस्य धनस्य विभागः,

८. दशविधस्त्रीधनस्य विभागः,

९. मृतस्य पत्युर्धन-ग्राहिण्यः,

१०. स्त्रीधन-ग्रहण-व्यवस्था,

११. स्त्रीधनविभागः,

१२. पित्र्यरिक्थ-विभागकाले गुप्तरूपेण रक्षितस्य पश्चाज्ज्ञातस्य गुप्तप्राप्त-धनस्य विभागः,

१३. कुटुम्बे असमानवर्णेषु सन्तानेषु धन-विभागः,

१४. धन-विभाजनानन्तरं समुत्पन्ने सन्ताने धन-विभागः,

१५. औरसादि द्वादशविध-पुत्र-विचारः,

---

१. नारदीयसंहिता १४१९, नारदस्मृतिः १६ ।१ ।

१६. अपुत्रधन-ग्रहणाधिकार:,

१७. विभागात्परं केनापि कारणेन पुन: सम्मिलितस्य संसृष्ट-धनस्य विभाग-व्यवस्था,

१८. दान-विक्रयाधिकार:,

१९. विभाजनसम्बद्ध-विवाद-निर्णय: इत्यादिविषया: विस्तरेण विवेचिता: सन्ति ।

ग्रन्थेऽस्मिन् नारद-मनु-शङ्ख-लिखित-बृहस्पति-विष्णु-हारीतापस्तम्ब-बौधायन-देवल-व्यास-वसिष्ठ-कात्यायन-याज्ञवल्क्य-महाभारत-रामायण-गौतम-वृद्धमनु-हलायुध-यम-पैठिनसि-प्रभृतीनां स्मृतिकाराणाम् प्रमाण-वचनानि समुद्धरता ग्रन्थकृता दायभाग-विषयक-विवादान् विनिर्णेतुं सम्बद्धविषयक-मिथिला-व्यवहार-प्रकाशकं ग्रन्थरत्नमिदं सम्पादयाञ्चक्रे ।

ग्रन्थान्ते— *इति महामहोपाध्याय-श्रीविद्यापतिठक्कुर-विरचितो विभागसार: समाप्त: । शमस्तु ॥* इत्येवं समुपलभ्यते ।

एवं हि दायभाग-विवाद-निर्णायकतया सप्रमाणं निबद्धो महाकवेर्विभागसार-ग्रन्थोऽयम् कमपि विशिष्टं महिमानमादधातीतिशम् ।

१२. दानवाक्यावली

(दानकर्मानुष्ठानविषयक-विवरणात्मिका)

मिथिलामही-महेन्द्रस्य वदान्यशिरोमणेर्नरसिंहदेवस्य धर्मपत्नी परम-शोभाग्यशालिनी महाराज्ञी धीरमती चारुचरिताऽरुन्धतीव दाने कल्पलतेव विभवे पद्मालयेव विशिष्टगुणगणालंकृता आसीत् । अस्या एव निदेशेन महाकवि- दान वाक्यावलीति नामानं विश्रुतं ग्रन्थम् १४३५ ख्रीष्टाब्द-समीपवर्तिनि समये विरचयाञ्चकार ।

दान-धर्म-कर्मानुष्ठान-विषयकेऽस्मिन् ग्रन्थे आदौ अधस्तनेन पद्ययुगलेन मङ्गलं विधाय महाकविः पद्यचतुष्टयेन महाराजनरसिंहदेवस्य महाराज्ञ्या धीरमतीदेव्याश्च प्रशस्तिं पल्लवयाञ्चकार

वन्दे मुकुन्दस्य पदारविन्दं
वन्दारु-वृन्दारक-वृन्द-वन्द्यम्।
मन्दाकिनी यन्मकरन्द-बिन्दु-
सन्दोह-सन्देहधियं दधाति॥

त्रैलोक्याधिपतेः पदत्रयभुवं दैत्याधिपं याचतो-
दत्तां सत्त्वमयेन तेन वसुधामेवाग्रतो गृह्णतः।
देवार्थे बलिनं बलिं छलयतोऽप्यस्मै हरेस्तुष्यतः
स्वाराज्य- प्रतिभू-भविष्णु सपदि स्वस्त्यक्षरं पातु वः॥

श्रीकामेश्वरराजपण्डित-कुलालङ्कारसारः श्रिया-
मावासो नरसिंहदेव-मिथिला- भूमण्डलाखण्डलः।
दृप्यद्दुर्धर-वैरिदर्प-दलनोऽभूदर्पनारायणो-
विख्यातः शरदिन्दु -कुन्द-धवल-भ्राम्यद्यशो मण्डलः॥

तस्योदारगुणाश्रयस्य मिथिलाक्ष्मापालचूडामणेः
श्रीमद् धीरमती प्रिया विजयते भूमण्डलालङ्कृतिः॥

दाने कल्पलतेव चारुचरिते याऽरुन्धतीव स्थिरा
या लक्ष्मीरिव वैभवे गुणगणे गौरीव या गण्यते।
वापी पुष्पजलाधिका सुविमला विज्ञानवापी समा
रम्यं तीर्थ-निवासि वास-भवनं-चन्द्राभमभ्रंलिहम्।

उद्यानं फल-पुष्प-नम्रविटप-च्छायाभिरानन्दनं
भिक्षुभ्यः सरसान्न-दानमनघं यस्या भवान्या इव ॥
लक्ष्मीभाजः कृतार्थानकृतसुमनसो या महादानहेम-
ग्रामै राजीवराजी बहलतर-परागाप्तरागैस्तडागैः ।
विज्ञाऽनुज्ञाप्य विद्यापतिमतिकृतिनं सप्रमाणामुदारा
राज्ञी पुण्यावलोका विरचयति नवां दानवाक्यावलीं सा ॥

ततश्च ग्रन्थेऽस्मिन् महाभारत-विष्णु-धर्मोत्तरानुसारेण दान-प्रशंसां[१] विधाय वेदोक्तसत्कर्मसु दानस्य श्रेष्ठत्वम्, दानेनैव धनस्य साफल्यम्, दानवर्जितवित्तस्य आनर्थक्यम्, याचकाय यत्किञ्चित्समर्पणेनैव जीवनस्य साफल्यम्, कलिकाले दानस्यैव सकलकलुष-क्षय-कारित्वम्, न्यायार्जितवित्तस्य देश-काल-पात्रानुरोधेन यथाविधि दानेनैव अनन्तफलप्रदत्वम् जायते इत्यादि विषयान् सम्यगभिधाय, शास्त्रोक्तलक्षण-लक्षितस्य सुपात्राय श्रद्धापूर्वकदानमेव वस्तुतो दानमिति निरूप्य दाता, प्रतिग्रहीता, श्रद्धा, धर्मोपार्जितद्रव्यम्, प्रशस्तो देशः, विहितः कालश्चेति दानस्य षडङ्गानि निरूपयामास ।

ततश्च दातृत्व- प्रति ग्रहीतृत्व-प्रयोजक-गुण-समुच्चयः, दातुः प्रतिग्रहीतुश्च अनर्हत्व-भूता दोषाः, दाय-लाभ-क्रय-जय-पर्युदञ्चन-सेवावृत्ति-सत्प्रतिगृह-लभ्यस्य द्रव्यस्य धर्म्यत्वम्, तस्यैव च द्रव्यस्य दान-विधौ देयद्रव्यत्वम्, देश-विशेषे कालविशेषे च दुर्लभस्य वस्तुनः तत्तद्देशकालविशेषानुरोधेनैव दानार्हत्वम्, सर्वस्वं गृहं च वर्जयित्वा कुटुम्बभरणादवशिष्टस्य वित्तस्य दानार्हत्वम्, दानर्ह काल-विचारः,

---

१. यानीमान्युत्तमानीह वेदोक्तानि प्रशंससि ।
तेषां श्रेष्ठतमं दानमिति मे नात्र संशयः ॥ महाभारते ।
दानं देवाः प्रशंसन्ति मनुष्याश्च तथा द्विजाः ।
दानेन कामानाप्नोति यान् कांश्चिन् मनसेच्छति ॥
विष्णुधर्मोत्तरे । दानवाक्यावली पृ.सं.३ ।

सङ्क्रमणे, राहूपरागे, व्यतीपातयोगे, आषाढ-कार्तिक-फाल्गुन-पूर्णिमासु, तुलायां मेषमकरे च सूर्य-संक्रमणे, यज्ञोत्सव-विवाह-जातकर्म-कालेषु प्रदत्तदानस्य महाफलत्वम्, पुण्यावहानां भारतभूभाग-विशेषाणां परिचयपूर्वकम् ब्रह्मावर्त-ब्रह्मर्षिदेश-मध्यदेशार्यावर्त- यज्ञियदेशेषु तत्तललक्षण-लक्षितेषु दानकर्मानुष्ठानस्य प्राशस्त्यम्, म्लेच्छदेशस्य दानकर्मानर्हत्वम् गोमयोपलिप्त-गृहाजिर-महातीर्थ-पुण्याश्रम-नदी-तीर-कूपाराम-सरोवरोपकण्ठस्थितेषु स्थान-विशेषेषु सर्वेषां देवानां सन्निधानात् तत्र दानस्य कोटि गुणाधिकपुण्यफलप्रदत्वञ्चेत्यादि-विषयान् विशदं निरूप्य न्यायार्जितानि गो-भूमि-तिल-सुवर्ण-वसनादीनि देय-द्रव्याणि गङ्गादिपुण्यनदीप्रदेशे राहूपराग-समये स्नानशोचाचारपूतः प्राङ्मुखः कुशोदकहस्तो दाता सुशीलाय विद्यासम्पन्नाय अकृतोपकाराय उदङ्मुखाय सद्विप्राय-श्रद्धापुरस्सरं सदक्षिणं दानं यथाशक्ति दद्यादिति दानविधिं न्यरूपयत् ।

ततश्च देय-द्रव्येषुदेय-वस्तु-देवतानिर्देशपूर्वकम् प्रतिग्रहप्रकार-वैविध्यं प्रदर्शनपुरस्सरञ्च हिरण्य-हिरण्य-तोलक-हिरण्यभाष-हिरण्यकृष्णल-रजत-राजत-सौवर्णालङ्कार-तैजसपात्र-जलपात्र-जल-रत्न-हेमनिर्मितमुनिरूपत्रिंशत्कल्पानाम् वस्तूनाम्, गृह-गो-वृषभ-महिषी-गजाज-मेषादिरूपाणां द्रव्याणाम्, गुडादिकल्पित-धेनु-गुडभार-गुडहार-सिन्दूरभार-कृष्णाजिन-भूमि-मधु-गोरसान्नेक्षुरस-पानक-लेह्य-चोष्य-तैल-लवण-गन्ध-दीप-ताम्बूल-फल-मूल-पुष्प-वृक्षाराम-शय्यासन-पादपीठ-काष्ठपादुकोपानच्छत्र-यानदासनद-शालग्रामशिला-शङ्ख-व्यजन-राजोपकरण-ताम्रादिधातु-दन्तकाष्ठेन्धन-पुस्तक-वस्त्र-यज्ञोपवीत-वैवाहिकद्रव्य-प्रार्थितवस्तु-प्रियवस्तूनाञ्च संकल्प-वाक्यनिर्देशपुरस्सरम्, फल-विशेष-निर्देश-पूर्वकम् दानस्य निरूपणं ग्रन्थकृता कृतम् । प्रासङ्गिकतया च ऋतु-मास-मासनियत-तिथि-पूर्णिमा-द्वादशी-सङ्क्रान्तिकालोत्तरायण-रवि-संक्रान्ति-रविवासर-पुष्यादिनक्षत्रविशेषेषु दान-विशेष्यविशिष्टफलानां प्रतिपादनं विहितम् ।

कर्मकाण्डप्रवीणेन पुराणादि-परिशीलन-निपुणेन कविवरेण ग्रन्थेऽस्मिन् प्रमाणत्वेन महाभारत-विष्णुधर्मोत्तर-नन्दिपुराण-व्यास-बृहस्पति-याज्ञवल्क्य-मनु-यम-कात्यायन-देवल-शातातपशङ्ख-लिखित-विष्णु-मरीचि-बौधायन-हारीताप-

स्तम्ब-गौतम-यावालाङ्गिरस-मत्स्यपुराण-वायुपुराण-भविष्य-लिङ्ग-कूर्माग्नेय-शिव पुराणादित्यपुराण-नरसिंह-वराह-ब्रह्म-स्कन्द-वामन-नन्दि-पद्म-ब्रह्माण्ड-देवीपुराण-कालिकापुराण-संवर्त-साम्बपुराण-मार्कण्डेयपुराण-वैद्यकशास्त्र-दान-सागर- यमगीतादीनां शतशः वचनानि संगृहीतानि, यानि ग्रन्थस्यास्य समुपयोगित्वं महत्त्वञ्च प्रकटयन्ति ।

एवं हि कर्मकाण्डे प्रकाण्ड-पाण्डित्यं प्रकटयता तत्तद्द्रव्यदाने विशिष्टसंकल्पवाक्यं संयोजयता ग्रन्थकृता सरलेन पथा सविस्तरं दानविधिः प्रदर्शयाञ्चक्रे ।

ग्रन्थान्ते च महाकविना धीरमतीदेव्याः प्रकृत-ग्रन्थस्य च आकल्पान्तस्यापि चन्द्रमरीचि धवलं यशो जगत् प्रकाशमानं तिष्ठेदिति निश्चिन्वानेन अधस्तनं पद्यरत्नं प्रकाशयाञ्चक्रे—

यावत्स्वर्गतरङ्गिणी हरजटाजूटालमालम्बते

यावद् विश्वविकास-विस्तृतकरः सूर्योऽयमुज्जृम्भते ।

यावन् मण्डलमैन्दवं विजयते शम्भोः शिरोमण्डले

तावत् कीर्तिलतेयमस्तु सफलादेव्यास्सतां श्रेयसे ॥

निबन्धान् सकलान् वीक्ष्य श्रीविद्यापतिसूरिणा ।

दानवाक्यावली देव्याः प्रमाणै र्विमलीकृता ॥

इति समस्त प्रक्रिया विराजमान-दान-दलितकल्पलताभिमान-भवभक्ति-भावितबहुमान-महामहादेवीश्रीधीरमतीविरचिता दानवाक्यावलीसमाप्ता । इति-शम् ।

१३. दुर्गाभक्तितरङ्गिणी

(शाक्तागमपुराणोपवर्णित-दुर्गापूजनविधिविषयिका)

मिथिलामहीमहेन्द्रे महाराजनरसिंहदेवे राज्यं प्रशासत्येव तज्ज्येष्ठतनूजो नय-विनयादि-विभूषणो विश्रुत-प्रौढ-प्रतापोदयो धर्मनीति-निष्णातः सज्जनानामाश्रयी-भूतः पितृ-स्नेह-वशीभूतः हृदयनारायणधीरसिंहः विधानेन यौवराज्यपदे समासीनोऽपि वस्तुतो महाराज इव शासनं कुर्वाण आसीत् । एतस्यानुजन्मा राज्य-प्रशासने विहितसहयोग-कर्मा सततप्रदर्शितानुजधर्मा प्रख्यातगरिमा रूपनारायणे-त्युपनामा भैरवसिंहः हृदयेन राज्यशासने सहभागित्वं वहति स्म । प्रजानुरञ्जकयोः दण्डनींति-विशारदयोरेतयोः सहोदरयोः प्रशासनपाटवेन मिथिलायां सौराज्ये विद्य-माने महाराजेति विरुदेन विख्यातस्य धीरसिंहदेवस्य १४४० ख्रीष्टाब्दासन्नसमये निवेदनानुज्ञामवाप्य कर्मकाण्डप्रवीणः शाक्तागम-पारावार-पारीणः महाकविर्विद्या-पतिः श्रीदुर्गापूजा-विधि-विषयकं दुर्गाभक्तितरङ्गिणीति नाम्ना विश्रुतं ग्रन्थरत्नं रचयाञ्चकार ।

ग्रन्थारम्भे सर्वविघ्नहरं देवं गणपतिं मङ्गल-श्लोक-युगलेन समाराध्यमहारा-जधीरसिंहस्य तदनुजस्य भैरवसिंहस्य च प्रशस्तिं पद्यचतुष्टयेन विशदयाञ्चकार—

अभिवाञ्छितसिद्ध्यर्थं वन्दितो यः सुरैरपि ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥

भक्त्या नम्र-सुरेन्द्र-मौलि-मुकुट-प्राग्भार-तार-स्फुर-
न्माणिक्य-द्युति-पुञ्ज-रञ्जित-पदद्वन्द्वारविन्दाश्रयः ।
देव्यास्तत्क्षणदैत्यदर्प-दलनासंवित्प्रहृष्टामर-
स्वाराज्य-प्रतिभू-भविष्णु-करुणा गम्भीर दृक् पातु वः ॥

अस्तिश्रीनरसिंहदेव मिथिलाभूमण्डलाखण्डलो-
भूभृन् मौलि-किरीट-रत्न-निकर-प्रत्यार्धिताङ्घ्रिद्वयः ।

आपूर्वापरदक्षिणोत्तरगिरिप्राप्तार्थि-वाञ्छाधिक-
स्वर्णक्षोणि-मणि-प्रदान-विजितश्रीकर्णकल्पद्रुमः ॥
विश्वख्यातनयस्तदीयतनयः प्रौढप्रतापोदयः
सङ्ग्रामाङ्गणलब्ध-वैरि-विजयः कीर्त्याप्तलोकत्रयः ।
मर्यादा-निलयः प्रकामविनयः प्रज्ञाप्रकर्षाश्रयः ।
श्रीमद्भूपतिधीरसिंहविजयी राजत्यमोघक्रियः ॥
शौर्यावर्जितपञ्चगौड-धरणीनाथोपनम्रीकृता-
नेकोत्तुङ्ग-तुरङ्ग-सङ्गत-सितच्छत्राभिरामोदयः ।
श्रीमद्भैरवसिंहदेव-नृपतिर्यस्यानुजन्मा जय-
त्याचन्द्रार्कमखण्डकीर्तिसहितः श्रीरूपनारायणः ।
देवीभक्तिपरायणः श्रुतिमुखप्रारब्ध-पारायणः ।
संग्रामे रिपुराजकंसदलन-प्रत्यक्षनारायणः ।
विश्वेषां हितकाम्यया नृपवरोऽनुज्ञाप्य विद्यापतिं
श्रीदुर्गोत्सवपद्धतिं स तनुते दृष्ट्वा निबन्धस्थितिम् ॥

ततः प्रमाणतरङ्ग-प्रयोगतरङ्गेतितरङ्गद्वितये विभक्तस्य प्रकृतग्रन्थस्य प्रथमे प्रमाणतरङ्गे क्रमशः

१. देवीपुराण-भविष्यपुराणानुसारं देवीपूजागृहनिर्माणम्,

२. देवी-मार्कण्डेयपुराणानुसारं देवीपूजागृहे प्रतिमानिवेशनम्,

३. मत्स्य-कालिकापुराणानुसारं प्रतिमालक्षणम्,

४. तत्पुराणानुसारेण चण्डिकारूपप्रतिपादनम्,

५. तथैव चामुण्डारूपकथनम्,

६. एवमेव तदनुसारेण सर्वमङ्गलारूपकथनम्,

७. ब्रह्मपुराणानुसारेण प्रतिमाभ्यङ्गव्यवस्था,

८. सामान्यार्धस्वरूप-प्रतिपादनम्,

९. जप-होमोपयोगि-मन्त्र-निर्देशः,

१०. गन्धपुष्पाक्षतदानविधिः,

११. कालिकादेवीपुराणानुसारं पूजोपचारप्रतिपादनम्,

१२. देवीपूजने विहितपुष्पाणां कथनम्,

१३. विभिन्नपुराणानुसारं धूप-दीप-नैवेद्यविधिप्रतिपादनम्,

१४. शारदीयदेवीमहोत्सवपूजाविधिः,

१५. आश्विनकृष्ण-नवम्यादि-पूजाकल्पः,

१६. आश्विनशुक्लप्रतिपदादिपूजासूचनम्,

१७. प्रतिपदादिप्रतिदिनकृत्यम्,

१८. षष्ठ्यादिपूजाविधानम्,

१९. सप्तम्यादि पूजाविधानम्,

२०. तिथि-नक्षत्र-बलाबल-कथनम्,

२१. तिथिद्वैध-व्यवस्था,

२२. प्रतिपदि यजमानस्नापनाय शान्तिकलशस्थापनविधिः,

२३. स्वस्त्ययनविधिः,

२४. देवीमाहात्म्यश्रवणकीर्तनम्,

२५. द्वितीयादिरेवन्तादिपूजाविधिः,

२६. गजपूजनविधानम्,

२७. षष्ठ्यां विल्वाभिमन्त्रणम्,

२८. सप्तम्यां पत्रिकाप्रवेशविधिः,

२९. महाष्टमीकृत्यम्,

३०. महाष्टमीमहानवम्योः कृत्यसूचनम्,

३१. महाष्टमी-महानवम्योर्नवदुर्गापूजाविधिः,

३२. सर्वमङ्गला-पूजाविधिः,

३३. उग्रदण्डा-पूजाविधिः,

३४. दशभुजा-पूजाविधिः,

३५. चतुःषष्टिदेवीश्रीविग्रहकथनम्,

३६. महानवमीकृत्यम्,

३७. त्रिशूलिनीपूजाविधिः,

३८. मातृचक्रपूजनम्,

३९. कुमारिकार्चनम्,

४०. बलिदान-विधानम्,

४१. नीराजनविधिः,

४२. शालिहोत्रीयतुरग-नीराजन-विधिः,

४३. स्वातीसम्पातशान्तिविधिः

४४. यात्रामहोत्सवविधिः

इत्येतेषां विषयाणां सप्रमाणं विधानं विद्यते ।

द्वितीय प्रयोगाख्य-तरङ्गे—

१. कलश-स्थापनम्,

२. कलशे ब्रह्म-पूजनम्,

३. प्रतिपादादि-प्रतिदिनं दुर्गापूजविधानम्,

४. अश्वशालायामश्वप्रवेशनविधिः,

५. विल्वे देवी-बोधनामन्त्रणा-विधिः,

६. पत्रिकाप्रवेशनविधिः,

७. महाष्टम्यां देवीपूजाविधिः,

८. देवीनाम-संकीर्तन-विधिः,

९. देवी-दर्शन-विधिः,

१०. आवरणदेवता-पूजा विधानम्,

११. मातृका-पूजन-विधिः,

१२. अङ्गपूजा-विधिः,

१३. घृताम्यङ्ग विरूक्षणानन्तरं पञ्चगव्य-पञ्चामृत-चन्दन-वारि-सुरभिपुष्प-तोय-स्नपनविधानम्,

१४. अर्घ-समर्पण-विधिः,

१५. अनुलेपन-विधिः,

१६. पुष्प-बिल्वपत्र-समर्पणविधानम्,

१७. विहित-विविध-पुष्प-ग्रथित-माल्यार्पणविधिः,

१८. गुग्गुलुः कृष्णागुरु-धूपदान-विधिः,

१९. दीपदान-विधिः,

२०. आयसदीप-वृक्षस्य दीप्तदीपराजि-दान-विधिः,

२१. दीपसंघातदानविधिः,

२२. नैविद्यदानविधिः,

तत्र गुड-खण्डाज्यसम्मिश्रान्न-गुडसाधितघृतंपक्वान्न-शालिभक्त-घृतशर्करासहितपायस-सखण्डघृतपक्वापूव-सखण्डघृतसाधितमोदक— रम्भानारिकेलादिफल-केतकी कर्पूर वासितंपानीय-सपूगंताम्बूलप्रभृति-संभृत नैवेद्य समर्पण-विधानम्,

२३. चित्र-सूक्ष्मवसन-हेममुकुट-कनकतिलंक-कुण्डलकण्ठाभरण-मुक्ताहार-रत्नप्रालम्बिका-कङ्कणाङ्गुरीयकाद्यलंकरणप्रदानविधिः,

२४. हेमपात्रदान-विधिः,

२५. घण्टा-वितान-चामर-कनकदण्डसङ्गतधवलच्छत्रदान-विधिः,

२६. नानावर्ण-विचित्र-मयूरपक्ष-व्यजन-दान-विधानम्,

२७. दुकूल-तुलवस्त्र-प्रच्छदपट-समन्वित-रत्नखचितशय्या-दान-विधिः,

२८. आसन-काष्ठपादुकोपानत्समर्पण-विधिः,

२९. किङ्किणीजालसंवीत-श्वेतपताकोपशोभितमहाध्वजदानविधिः,

३०. दुर्गामण्डपनिवेशित-ध्वजमालादान-विधिः,

३१. चतुर्हस्तदण्डमान-परिमित-भूमिदान-विधिः,

३२. धान्यादिसस्य-दानविधिः,

३३. आलक्तक-सिन्दूर-सुवर्ण-रत्नदान-विधिः,

३४. छागादि-पशुबलिदान-विधिः,

३५. दुर्गादेव्याः शिरसा प्रणामस्य विधिः,

३६. दण्डवत्प्रणाम-विधिः,

३७. देवी-स्तुति-विधिः,

३८. पुष्पाञ्जलित्रय-समर्पण-विधिः,

३९. शस्त्रपूजाविधिः,

४०. चामरच्छत्र-ध्वज-पताका-शङ्ख-सिंहासनतुरग-पूजन-विधिः,

४१. माषकभक्तबलिदान-विधिः,

४२. सामान्य-बलिदानविधिः,

४३. अर्द्धनिशाशेष-कालिकदेवीपूजाविधिः,

४४. नृत्य-गीत-वादित्र-पुरस्सररात्रि-जागरण-विधिः,

४५. महानवमीकृत्ये शूलाकृतिदुर्गापूजाविधिः,

४६. महानवम्यां दुर्गापूजाविधानम्,

४७. छाग-बलिदानविधिः,

४८. महिषबलिदानविधिः,

४९. मातृ-चक्रपूजा-विधिः,

५०. मातृभ्यः समांस-माषभक्त-बलि-समर्पणविधिः,

५१. कुमारी-पूजनविधिः,

५२. दुर्गामाहात्म्यश्रवणविधिः,

५३. होम-विधानम्,

५४. मन्दुरायां रेवन्तपूजाविधानम्,

५५. विजयदशम्यां देवीविसर्जनम्,

५६. देवीश्रीविग्रह-जलप्रवाहण-विधिः,

५७, दक्षिणादानविधिः,

५८. तदनन्तरमपराजितापूजाविधिः,

५९. यजमानकर्तृकप्रदक्षिणकृत्यस्यविधिः,

६०. अपराजितालताधारण-विधिः,

६१. ब्राह्मणद्वारा शान्तिकलशसलिलाभिषेक-विधिः,

इत्यादयो विविधविषयाः संकल्पवाक्यप्रयोगपुरस्सरं सम्यक् प्रतिपादिताः सन्ति ।

ग्रन्थेऽस्मिन् प्रमाणत्वेन समुद्धृतेषु ग्रन्थेषु देवी-भविष्य-कालिका-ब्रह्म-लिङ्ग-स्कन्द-शिवशिवरहस्यादिपुराणानाम्, विष्णु-गौतम-देवल-गर्गादिस्मृतीनाम्, कृत्य-रत्नाकर-राजमार्तण्ड-गुणिसर्वस्व-गौडनिबन्ध-शालिहोत्र-बृहत्संहितादिग्रन्थानां नामानि समुपलभ्यन्ते ।

मङ्गलान्तो हि ग्रन्थः प्रथते इति परम्परानुसारं ग्रन्थान्ते देव्याः स्तुतिम् आश्रय-दातुश्च प्रशस्तिं कुर्वाणो महाकविः अधस्तन पद्य-कदम्बेन ग्रन्थं समापयति—

कारुण्यैकवशंवदा प्रणमतो बालानिव त्रायते
भीतिभ्यो धनपङ्कलिप्तवपुषः प्रक्षालयत्यम्बिका ।
संसारे स्खलतः समुद्धरति या मोहान्धकारावृते
साऽव्याद् वः शरणागतार्तिशमनी देवी जगत्पावनी ॥

भूपश्रीभवसिंह-वंशतिलकः श्रीदर्पनारायण-
स्वात्मानन्दननन्दनक्षितिपतिः श्रीधीरसिंहः कृती ।
शक्रश्रीः सहभूरुपेन्द्रमहिम श्रीभैरवक्ष्माभुजो

दुर्गाभक्तितरङ्गिणी कृतिरियन्तरंगास्तु सत्प्रीतये ॥

मर्यादाम्बुनिधिः सदानयविधिः प्रौढप्रतापावधिः

सद्यः सङ्गर-सङ्गरङ्गविजयश्रीलब्ध-दोःसन्निधिः ।

यस्य क्षीर-समुद्रमुद्रयशसो रामस्य सौमित्रिवत्

क्षोणीमण्डलमण्डनो विजयते श्रीचन्द्रसिंहोऽनुजः ॥

इति समस्तप्रक्रियाविराजमान-दलितरिपुराजमानमहाराजाधिराज-शिवभक्तिपरायण-श्रीमद्देवात्मज-समस्तप्रक्रियालंकृतमहाराजाधिराजवीरश्रीधीरसिंहदेवानां समर-विजयिनां कृतौ दुर्गाभक्तितरङ्गिणी समाप्ता । औं नमश्चण्डिकायै ॥

एवञ्चेयं सहाकवि-विद्यापति-विरचिता पुराणशाक्तागमसिद्धान्तानुसारिणी दुर्गाभक्तितरङ्गिणी पारम्पर्य-क्रमागतां मिथिलादेशीयां दुर्गापूजापद्धतिं व्यवस्थापयन्ती भारतस्य पूर्वस्मिन् भागे सर्वत्र समादरं लभमाना किमपि अपूर्वमेव वैशिष्ट्यं बिभर्ति । वङ्ग-कलिङ्ग-कामरूपेषु एतस्या एव पद्धतेर्विशेषतोऽनुसरणं भवति ।

एवं हि शरणागतभक्त-वत्सलाया गजदम्बिकायाः प्रीतये महाकविना कृता इयं कृतिः नूनं सतामपि प्रीतये कल्पते इतिशम् ।

१४. व्याडीभक्तितरङ्गिणी

(विषहरीदेवीपूजा-विधिविधानात्मिका)

महाराज-धीरसिंह-भैरवसिंहयोः प्रशासनसमये एव १४४५ क्रीष्टाब्दसमीपवर्तिनि काले महाकविः विषहरीपूजा-विधिविधानविषयकं व्याडीभक्तितरङ्गिणीति नाम्ना प्रथितं ग्रन्थं दर्पनारायणनरसिंहदेवस्य निर्देशेन व्यरचयत् । ग्रन्थस्यास्य व्याडिभक्तितरङ्गिणी, व्यालीभक्तितरङ्गिणीति नामान्तरमपि समुपलभ्यते ।

मिथिलायां द्विजाति-परिवारेषु सामान्यतः त्रिपुरा-कालिका-दुर्गा-भवानीरूपाणां पञ्च भगिनीनां कुलदेवतानां[१] सीरात्मकं पीठं निर्माय प्रत्यहं तासां पूजनं विधीयते । पीठस्य पार्श्वे विषहरीदेव्या व्यालीस्वरूपायाश्चित्रात्मकं रूपं चित्रीकृत्य तदर्चनं क्रियते । श्रावणे मासि उभयोः पक्षयोः पञ्चम्योः नागपूजनं विशेषतो विधीयते । अस्या एव विषहरीदेव्याः शास्त्रीयपद्धत्या पूजाविधानं ग्रन्थेऽस्मिन् वर्णितं वर्तते ।

ग्रन्थारम्भे ओं नमो गणेशाय इत्येवं मङ्गलं विधाय महाकविर्निर्दिशति—

प्रथमतः सूर्यार्घ्यं दत्वा स्वस्तिवाचनं कुर्यात् ।

ओ३म् स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।

स्वस्ति नस्ताक्ष्यों अरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥

ओ३म् स्वस्ति स्वस्ति—

वेतालाश्च पिशाचाश्च राक्षसाश्च सरीसृपाः ।

अपसर्पन्तु ते सर्वे वैष्णवास्त्रेण ताडिताः ॥

सूर्यः सोमो यमः कालः सन्ध्ये भूतान्यहः क्षपा ।

पवनो दिक्पतिर्भूमिराकाशं खचरामराः ॥

ब्राह्मं शासनमास्थाय कल्पध्वमिह सन्निधिम् ॥

आकाश-देव-वेतालाः लोकानां सौख्यमोक्षदाः ।

पृथिव्याः प्रतिलोकेशा लोकवादा इतीरिताः ॥

---

१. त्रिपुरा कालिका दुर्गा भवानी गिरिजा तथा ।
एताः पञ्च भगिन्यस्तु भवन्ति कुलदेवताः ॥ द्र० कल्याण-देवताङ्क पृष्ट सं० ३९७ ।

ते च सर्वभूत-डाकिन्यादि-शान्त्यर्थं लौकिकवधमन्त्रादयो विषहरी-मङ्गल-चण्डिका-गीतादयश्च ।

ततः सिद्ध-नाग-किन्नर-गन्धर्व-यक्ष-राक्षससहितानां देवतानां मृण्मयीं प्रतिमां विधाय गीतनर्तनादिपूर्वकं पूजनविधानं निर्दिशति ।

एतत्प्रसङ्गे पूजाविधानार्थं मनोरमाया नौकाया मानमपि प्रमाणपुरस्सरं निगदति—

अधमा विंशहस्ता नौश्चत्वारिंशच्च मध्यमा ।
उत्तमा षष्टिहस्ता च शतहस्तोत्तमोत्तमा ॥
चतुर्दश महाभव्यालोकाः संपरिकीर्तिताः ।
सन्निधौ भूतनाथस्य विपुलायाश्च नर्तने ॥
ये ये समागता द्रष्टुं तान् संस्तुत्य प्रपूजयेत् ॥

ततश्च निम्नलिखितानां पूजाकर्तव्येति प्रतिपादयति—

ब्रह्माणं माधवं रुद्रं वाणीं लक्ष्मीं च पार्वतीम् ।
कर्तिकेयं गणेशं च कालीयं पन्नगाष्टकम् ॥
जरत्कारु मास्तिकञ्च मर्त्ये चन्द्रधरं तथा ।
स्वर्णं रेखाञ्च तत्पत्नीं पुत्रं लक्ष्मीधरन्तथा ॥
तत्पत्नी विपुलाञ्चापि श्रीधराख्यं द्विजं तथा ॥
यशोधरञ्च देवज्ञं कर्णधारञ्च दुर्लभम् ॥
अग्रे गणेशं लोकानां पत्तिनोऽष्टौ मनोहरम् ।
भाण्डारिणञ्चास्त्रधरान् मध्येऽग्रे मूलके तथा ॥
नेत्राख्यां रजकीञ्चैव सुगन्धाञ्च तथापराम् ।

सुरेश्वरीं तथा दुर्गां देव्या दिक्षु समन्ततः ।
इन्द्रादिलोकपालांश्च सायुधान् स्वस्ववाहनान् ॥
पूजाहोमादिकं कुर्यादयुग्मदिवसं द्विजः ।
यथाकामं यथाशक्ति बलिदानं विधानतः ॥
नीराजनञ्च कर्तव्यं तौर्यत्रिकपुरस्सरम् ।
नद्याञ्च स्थापयेद्देवीमुडुपे चोत्तमे ततः ॥
दक्षिणां विधिवद् दत्वा गीतवाद्यैः समापयेत् ॥
दर्शनाच्च विचित्राया वाग्दृष्टि करणं भवेत् ।
नावो नाम्ना च गोहारी विख्याता सा महीतले ॥
योऽर्च्चयेत् सुरसां देवीं व्रतस्थो भक्तिभावतः ।
इहेष्टकामान् संप्राप्य देहान्ते स्वर्गमुत्तमम् ॥
पुत्र-पौत्रः प्रपौत्रान्तं लक्ष्मी-नैरुज्यभाग् भवेत् ॥
डाकिन्यादिभयं नास्ति न च सर्पभयन्तथा ॥

एवं हि फलनिर्देशपूर्वकमेतेषां पूजाविधानं प्रतिपाद्य गौडमैथिलकृत्यसारानुसारम् पुनः पूजनं प्रस्तौति ।

ततश्च रयहानिं प्रतिपाद्य हेमाद्रि-काशीखण्डानुसारं सामान्यदेवताघटनार्थम्—प्रतिमा-विधानं निगदति—

सौवर्णी राजती ताम्री मृण्मयी वा विशेषतः ।
यथाश्क्तिं प्रकर्तव्या प्रतिमा स्वर्द्धि-वृद्धये ॥
गौडमैथिलप्राच्यादि कृत्यसारानुसारन्तु—
प्रतिमायाञ्च चित्रे च मण्डले वा घटेऽपि वा ।

पूजयेत् सुरसां देवीं दुर्गावद् भुवि साधकः ॥

अत्र छागादिबलिप्रदानं परमावश्यकमिति तेन स्पष्टं प्रतिपादितम् ।

एतत्प्रसङ्गे सकृत् पूजाकरणादेव फलसिद्धिर्जायते तथापि फलबाहुल्याय दिनत्रयादिकं प्रत्यहं पूजनीयम् । तथा हि जैमिनिः—

फलस्य कर्म-निष्पत्ति र्लोकवत्-प्रतिमानतः ॥

इति कथनात् यथालौकिके कर्षणादीनां बाहुल्ये पुनः फलादिकं तथा वैदिक-कर्मणोऽपि कर्मबाहुल्ये फल बाहुल्यं भवतीति तात्पर्यम् ।

कर्मकुर्वतां यत् तादृशं फलं न दृश्यते तत्र कलि-स्वभावात् कर्मणो वैगुण्यात् तथा भवतीति । विष्णु पुराणादि वचनैः महाकविः साधयति ।

"स्थण्डिले हस्तमात्रे च मण्डलं चतुरस्रकम्" इति मण्डल-प्रमाणं निरूपयन् मनसादेवीपूजनफलं निर्दिशति—

चतुष्कोणं चतुर्द्वारं रक्तपद्मविभूषितम् ।
पूजयेन्मनसादेवीं तत्र नागाष्टकैः सह ॥
सुप्ते जनार्दने कृष्णे पञ्चम्यां भवनाङ्गने ।
पूजयेन् मनसादेवीं स्नुही-विटपसंस्थिताम् ॥
देवीं सम्पूज्य नत्वा च न सर्पभयमाप्नुयात् ।
पञ्चम्यां पूजयेन्नागाननन्ताद्यान् महोरगान् ॥
क्षीरं सर्पिस्तु नैवेद्यं देयं सर्पविषापहम् ।

ततः अष्टौ नागान्—

अनन्तो वासुकिः पद्मो महापद्मोऽथ तक्षकः ।
कुलीरः कर्कटः शङ्खो ह्यष्टौ नागाः प्रकीर्तिताः ॥

इति निर्दिश्य—

कालीयं धृतराष्ट्रं च पिङ्गलं मणिभद्रकम्।

तथैवैरावतं नागं धनञ्जयमथार्चयेत्॥

चतुर्दश समाख्याता वरदा कामरूपिणः॥ इति

षडपरान् कामरूपिणो वरदान् नागान् प्रकीर्तयति।

ततश्च *'ओ३म् मनसादेव्यै नमः'* इति मनसादेव्यष्टाक्षरमन्त्रम् *'ओ३म् विषहर्य्यै नम'* इति विषहरीसप्ताक्षरमन्त्रं च निर्दिशति।

ततः अधिवासगृहम्, अधिवासनम्[1] प्रतिपाद्य मन्त्रस्वरूपं निरूपयति—

ओ३ङ्कारादि समायुक्तः नमस्कारान्तकीर्तितः।

स्वनामसर्वसन्तानो मन्त्र इत्यभिधीयते॥

ओ३ङ्कारं बिन्दुमध्यस्थं नामधेयाद्यमक्षरम्।

देवतानां स्वबीजं तत् पूजायामृद्धिसिद्धिदम्॥

ततश्च कुम्भकादिप्राणायाम-विधिः, कराङ्गन्यासः, षोडशोपचाराः,[2] नागानां प्रतिमा, स्थण्डिललक्षणम्, स्रुक्स्रुवविधानम्, होमविधिः, शान्तिपाठः, वामदेव्यगानम् प्रतिमाविसर्जनम् इत्यादयो विषयाः महाकविना सम्यङ् निरूपिताः। मध्ये च मनसादेवीपूजने तत्पार्श्वे अन्यदेवीदेवानां पूजन-विधानं निम्नप्रकारेण निर्दिशति—

पूजयेन्मनसादेव्याः पुरतो गणनायकम्।

दक्षिणे चण्डिकाञ्चैव वासुदेवञ्च पृष्ठतः॥

---

१. संस्कारो गन्धमाल्याद्यैः यः स्यात् तद्धि वासनम्। इत्यमरः

२. आसनै स्वागतं पाद्यमर्घ्यमाचमनीयकम्।
मधुपर्काचमन-स्नान-वसनाभरणानि च॥
गन्ध-पुष्पे धूप-दीपौ नैवेद्यं वन्दनं तथा॥

वामभागेमहादेवं सर्वकामफलप्रदम्।

यजेच्छिवान्तिके देव्या अवतारांस्तथापरान्।

इन्द्रादिलोकपालांश्च स्वस्वदिक्षु प्रपूजयेत्॥

ततश्चन्द्रधरादींश्च यथानाम्ना यजेत् क्रमात्॥

एतत् प्रसङ्गे—दाक्षिणात्यैः कालविषहरीत्वेन कृष्णवर्णाया देव्या पूजनं यत् क्रियते तद्व्यवहार्यमिति महाकविना प्रतिपाद्यते।

ततः—

द्वियामं वा चतुर्यामं लोककृत्यार्चना द्विधा।

क्लीङ्कृतिभिश्च पूजाभिरर्चितारोग्यदायिका॥

क्लीमिति ह्वै क्लीङ्कारस्तस्मिन् कृतिः करणं यस्यां पूजायां सा क्लीङ्कृतिः पूजेत्यर्थः। अनुक्तं यदन्यद् दुर्गाभक्तितरङ्गिण्यामनुसन्धेयम्, ग्रन्थगौरव-शङ्कयात्र-पुनर्न लिखितमिति। ततश्च-

इति समस्तप्रक्रियालङ्कृत-भूपतिवर-वीर-श्रीदर्पनारायणदेवेन समर-विजयिनाज्ञप्त-श्रीविद्यापतिकृतौ श्रीव्याडीभक्तितरङ्गिण्यां प्रधानतरङ्गः प्रथमः। श्रीव्याडीचरणे मद्भक्तिरस्तु।

ततः पाण्डुलिपेरन्तिमे पञ्चदशे पत्रे स्मृत्यागमपुराणानुसारात् व्याडीपूजाविधानं लिखितं महाकविना। तथा हि—

ओ३म् मनसादेव्यै नमः।

स्मृत्यागमपुराणादिलोकवादानुसारतः।

व्याडीपूजाविधानस्य प्रयोगो लिख्यतेऽधुना॥

एतत्क्रमे पूर्वमधिवासविधिर्निरूप्यते—

पूर्वदिने कृतनियमोऽधिवासदिने स्वयमधिवासात् प्राक् प्रातः काले कृतस्नानादिर्गोमयोपलिप्तदेशे दर्भपाणिराचान्त उदङ्मुखो दर्भयुक्तासन उपविष्ट ब्राह्मणान् स्वस्तिवाच्य—ओइम् तद्विष्णोरित्यनेन विष्णुं स्मृत्वा तत्सदित्युच्चार्य ताम्रं पात्रं दर्भत्रयतिलजलपूर्णं यथोपपन्नं वा गृहीत्वा ओ३म् यथामुके मासि अमुकपक्षे अमुकतिथिवारसुदिनत्रयं यावत् प्रत्यहममुकगोत्रः श्री-अमुकदेवशर्मा पुत्र-पौत्रप्रपौत्रावधि-ऋद्धिनैरुज्यप्राप्ति-सर्पभयाव्याप्त्यैहिकविविधभोगमनसादेवीप्रीति-कामो वा पूर्वस्वीकृतमनसादेवीपूजामहं करिष्ये । ततो दक्षिणादान पर्यन्तंपूजा-प्रयोगविधिवर्णितः ।

१५. गयापत्तलकम्

(गयाश्राद्ध-पिण्डदान-विधानात्मकम्)

लघुकलवरेऽस्मिन् पुस्तकेऽपि कस्यापि आश्रयदातुर्नृपतेर्नामधेयस्यानुल्लेखात् इदम् महाकविना जीवनस्यान्तिमे भागे विरचितमित्यनुमीयते ।

गयायां पिण्डदानेन पुत्रस्य पुत्रता[१] जायते इति स्मृतिकारेण प्रतिपाद्यते । अतः गयायां पिण्डदानस्य महत्त्वं जानानेन कर्मकाण्डप्रवीणेन महाकविना शास्त्रपुराणानुसारं गयातीर्थे स्थान-विशेषेषु पिण्डदानविधिः तत्फलञ्च संकल्पवाक्य-प्रयोगपुरस्सरं प्रतिपादयाञ्चक्रे ।

आरम्भे *ओं नमो गदाधराय'* इत्येवं मङ्गलं विधाय गयायामुत्तरमानस-ह्रदे स्नातुम् *ओमद्य पापक्षय-काम उत्तरमानसह्रदे स्नानमहं करिष्ये* इति संकल्प्य स्नानविधानम्, *'ओमद्य गयायां पित्रादिगतस्वर्गकामः पित्रादि-तर्पणमहं करिष्ये'* इति संकल्प-वाक्यानन्तरं तर्पणञ्च निर्दिष्टं विद्यते ।

ततो गयायां तीर्थश्राद्धस्य, पिण्डोपरि जलादिदानस्य च संकल्पवाक्यप्रयोगपुरस्सरं प्रतिपादनं वर्तते

---

१. जीवतो वाक्य-करणात् क्षयाहे भूरिभोजनात् ।
गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता ॥

ततः प्रेतशिलादौ पिण्डदानप्रसङ्गे *ओमद्यपित्रादि प्रेतत्व-विमुक्तिपूर्वक-शाश्वतब्रह्मलोकप्राप्तिकामः पितृणां पिण्डदानमहं करिष्ये* इति संकल्पपूर्वकम् पितृ-पितामह-प्रपितामह-मातामह-प्रमातामह-वृद्धप्रमातामहेभ्यः षड्भ्यः एवमेव मातृ-पितामही-प्रपितामही-मातामही-प्रमातामही-वृद्धप्रमातामहीभ्यः पिण्डान् दद्यादिति संकल्पवाक्य-संयोजन-पुरस्सरम् महाकविना निर्दिष्टम् ।

एवमेव भ्रातुरपि प्रेतत्वविभुक्तिकामनया पिण्डं दद्यादिति तत्रैव प्रतिपादितम् ।

ततो गयायां प्रेतशिलायां "गयाषोडशी" विधिप्रयोगः विस्तरेण निम्नलिखित-प्रकारेण निर्दिष्टः—

प्रथमं प्रेतशिलायां कुशानास्तीर्य एभिर्मन्त्रैरावाह्येत्—

ओम् अस्मत्कुले मृता ये तु गतिर्येषां न विद्यते ।
आवाहयिष्ये तान् सर्वान् दर्भपृष्टे तिलोदकैः ॥

एवमेव अज्ञातगतिकानाम् मातामहकुले मृतानाम्, श्वशुरकुले मृतानाम्, पितृ-वंशे मृतानाम्, मातामहकुले मृतानाम्, पितृवंशे मृतानाम्, मातामहकुले मृतानाम्, अज्ञातनामकमृतपुरुषाणाम्, अजातदन्तानाम्, गर्भे प्रपीडितानाम्, नामगोत्र विवर्जित बन्धुवर्गाणाम्, उद्बन्धनमृतानाम्, विष-शस्त्र हतानाम्, अग्निदाहेमृतानाम्, गर्भे प्रपी-डितानाम्, नामगोत्रविवर्जितबन्धुवर्गाणाम्, उद्बन्धनमृतानाम्, विष-शस्त्रहतानाम्, अग्निदाहे मृतानाम्, सिंह-व्याघ्रादिहतानाम्, दंष्ट्रि-शृङ्गि-व्यापादितानाम्, रौरवान्ध-तामिस्रकालसूत्रपतितानाम्, असिपत्रवन-कुम्भीपाकाद्यनेकयातनास्थान-स्थिता-नाम्, प्रेतलोकगतानाम्, पशु-पक्षि-कीट-सरीसृप-वृक्षादियोनिगतानाम्, सहस्रजात्यन्तरभ्रमणशीलानाम् आवहनं तत्र विधाय तेषां समुद्धरणाय पिण्डं दद्यात् ।

ततश्च—

ओं

येऽबान्धवाबान्धवा वा येऽन्यजन्मनि बान्धवाः।

ते सर्वे तृप्तिमायान्तु पिण्डदानेन सर्वदा॥

ओं

ये केचित् प्रेतरूपेण वर्तन्ते पितरो मम।

ते सर्वे तृप्तिमायान्तु पिण्डदानेन सर्वदा॥

ओं

दिव्यन्तरिक्षभूयिष्ठाः पितरो बान्धवादयः।

पाताले संस्थिता ये च तेषां पिण्डोऽस्तु मुक्तये॥

ओं

पितृवंशे मृता ये च मातृवंशे मृतास्तथा।

गुरू-श्वशुर-बन्धूनां ये चान्ये बान्धवा मृताः॥

ये म्रियन्ते लुप्तपिण्डाः पुत्र-दार-विवर्जिताः।

क्रियालोपगता ये च जात्यन्धाः पङ्गवस्तथा॥

विरूपा आमगर्भाश्च ज्ञाताज्ञाताः कुले मम।

तेषां पिण्डो मया दत्तो अक्षय्यमुपतिष्ठताम्॥

ओम् आब्रह्मणो ये पितृ-वंशजाता-

मातुस्तथा वंशगता मदीयाः।

कुलद्वये ये मम दासभूता

भृत्यास्तथैवाश्रितसेवकाश्च॥

मित्रं सखायस्तरवश्च वृक्षाः

सरीसृपा ये च कृतोपकाराः।

जन्मान्तरे ये मम सङ्गताश्च
तेभ्यः स्वधा पिण्डमहं ददामि ॥[1]

एवमेव मातृषोडश्यां वाक्ये पुरुषवत् स्त्रीलिङ्गं प्रयुज्य पिण्डदानं कुर्यात् इति प्रतिपाद्य लुप्तपिण्डोदकक्रियाणां पितृणां कृते पिण्डदानं भूमौ अन्नविकरणं समन्त्रकं निर्दिश्य साक्षिणः ऋणत्रयविमुक्त्यर्थं निवेदनीया इति निगद्यते—

ओं

सदक्षिणः सन्तु मे देवा ब्रह्मेशानादयस्तथा।
मया गयां समासाद्य पितृणां निष्कृतिः कृता।
आगतोऽस्मि गयां देव। पितृकार्ये गदाधर।
त्वमेव साक्षी भगवन्ननृणोऽहमृणत्रयात् ॥

ततः प्रदक्षिणं कुर्यात्।

ततश्च फल्गुनीतीर्थे स्नानस्य, तत्र श्राद्धस्य, दक्षिणमानसे स्नानस्य तत्र च श्राद्धस्य, महानद्यां स्नानस्य तर्पणस्य च, प्रभासहृदे स्नानस्य तत्र श्राद्धस्य च प्रेतशिलायां श्राद्धस्य, ब्राह्मण-स्पर्शस्य, गदाधरपूजनस्य, विष्णुपदे श्राद्धस्य, रुद्रपदे श्राद्धस्य, ब्रह्मपदे श्राद्धस्य, आम्रसेचनस्य च विधिः संकल्पवाक्यपुरस्सरं सम्यक्ते न प्रतिपादितः।

अन्ते च गयास्नान-पिण्डदानादेर्महत्वं प्रतिपादयन् महाकविर्निम्नोक्तमुद्धरति—

स्नानं कृत्वा गयालोले दृष्ट्वा च प्रपितामहम्।
अक्षयांल्लभते लोकान् कुलानां तारयेच्छतम् ॥
गया गतो गयालोलो गायत्री च गदाधरः।
गया गया-शिरश्चैव षड्गया मुक्तिदाः स्मृता[2]

१. गयापत्तलक-पाण्डुलिपि-श्लोकसंख्या १-२४

२. तत्रैव श्लोकसंख्या ३४

इति महामहोपाध्याय-विद्यापति-विरचितं गयापत्तलकम्। शुभमस्तु। श्रीरस्तु। ओं नमो भगवते गदाधराय। ओं तत् सत्।

एवञ्च कर्मकाण्डप्रधाने भारते गयाश्राद्धस्य कर्त्तव्यत्वं महत्त्वञ्च जानानेन कर्मकाण्डधुरीणेन महकविविद्यापतिना समाजस्य महते समुंपकाराय परमकल्याणाय च महत्त्वपूणमिदं गयापत्तलकं विरचयाञ्चक्रे इतिशम्।

१६. वर्षकृत्यम्

**(वर्षमभिव्याप्य कर्मकाण्ड-प्रतिपादित-
कृत्यविधिनिरूपणात्मकम्)**

इदमपि स्वल्प-स्वरूपं पुस्तकम् महाकविना चरमे वयसि लिखितम्। अतोऽस्यापि रचनाकालः तमेव १४४५ ख्रीष्टाब्दसमयं स्पृशति।

आद्यन्तभागखण्डितेऽस्मिन् पुस्तके अवशिष्टांशे कस्यापि मिथिलामहीमहेन्द्रस्य नामादिकं नोपलभ्यते। न च मङ्गलात्मकं किमपि पद्यं प्राप्यते।

अधिमिथिलं प्रतिमासं वर्षमभिव्याप्य एकाधिकानि पर्वाणि भवन्त्येव। तत्रतिथि-नक्षत्र-योगादिजन्यां विहितकालस्य विवाद-समस्यां महाकविः प्रमाणपुरस्सरं सम्यक् समादधाति, अनुष्ठेयकृत्यस्य च विधिं विदधाति।

चैत्रमासादाराभ्य तत्तन्मासीयपर्वणा तिथि-विशेषेषु अनुष्ठेयकर्मणां विधिं फल-निर्देशपूर्वक-संकल्पवाक्य पुरस्करं सप्रमाणं तद्विधानञ्च निरूपयति तत्र पारम्पर्यक्रमागतं मिथिलाव्यवहारं महाकविर्विशेषतोऽनुसरति।

विद्यापतेः पूर्वस्मिन् कालेऽपि मिथिलायाम् वर्षकृत्यात्मकं ग्रन्थं कर्मकाण्डप्रवीणा विद्वांसो निबबन्धुः। महाकविः स्वकीये वर्षकृत्ये परमावश्यक-कृत्यजातस्य संक्षेपेण वर्णनं विधाय एतस्य वैशिष्ट्यं सुस्पष्टं प्रदर्शयाञ्चकार।

१७. प्रश्नोत्तरमालिका

महाकवि-विद्यापतेः पूर्वोक्तेषु षोडशग्रन्थेषु कर्तृत्वमूलकः कोऽपि विवादो नास्ति। किन्तु प्रश्नोत्तरमालिकासम्बन्धे कतिचन विद्वज्जनाः विद्यापति-कर्तृत्वे संशेरते। अस्याः कृतेः अन्तिम-पद्येन "या विद्यापति-रचिता, प्रश्नोत्तरमालिका सेयम्" इत्यनेन विद्यापतेरेवेयं रचनेति निश्चीयते।

अत्र आर्यायां चतुर्दशपद्यानि प्रश्नोत्तरूपाणि जनजीवनोपयोगीनि विलसन्ति, यान्यत्र समुपन्यस्यन्ते—

कः कुलकमलदिनेशः? सति गुण-विभवेऽपि यो नम्रः।
कस्य वशे जगदेतत्? प्रियहित-वचनस्य धर्म-निरतस्य॥१॥
परधन-हृदयहरा का? सत्कविता वार-वनिता च।
कं न स्पृशन्ति विपदो? वृद्धवचोऽनुवर्तिनं च दातारम्॥२॥
कस्मै स्पृहयति कमला? निरलस-चित्ताय नीति-युक्ताय।
त्यजति च कं सा सहसा? द्विज-गुरु-हरि-निन्दकं च सालास्यम्।३।
किमगाधं जलधेरपि? खल-चरितं शब्द-विद्या च।
क्व खलु विधेयो वासः? सज्जन-निकटेऽथवा काश्याम्॥४॥
केनाऽशोच्यः पुरुषः? प्रणत-कलत्रेण वीरपुत्रेण।
इह भुवने कः शोच्यः? सत्यपि विभवे न यो दाता॥५॥
रामादपि कः शूरः? स्मर-शर-निहतो न यश्चलति।
किमहर्निशमनुचिन्त्यम्? केशव-चरणौ च तत्त्व-वार्ता च॥६॥
के खलु नयन-विहीनाः? परलोकं ये न पश्यन्ति।
वद वद बन्धिरतमः के? हितवचनं ये न शृण्वन्ति॥७॥

कः प्रथितस्त्विह खञ्जो? व्रजति न यो वार्धके तीर्थम्।
को मूकः खलु लोके? हित-वचनं यो न भाषते सदसि ॥८॥
किं गहनं भुजगादपि? स्त्रीचरितं राजसेवा च।
ब्रूहि स्पर्शमणिः का? स्वभ्यस्ता निर्मला विद्या ॥९॥
विषमिव विषमतरं किम्? प्रच्छन्नं यत् कृतं पापम्।
नलिनी-दल-चपलं किम? यौवनमायुर्बलं छाया ॥१०॥
प्राणादपि को रक्ष्यः? कुलधर्म-प्रत्ययः स्वसत्यञ्च।
का योषा कुलभूषा? भर्तृ-रता धर्मरक्ता च ॥११॥
को नृपतिः सुख-सेव्यो? निर्लोभी वृद्धसेवी च।
कः परिहार्यो देशः? पिशुनवृत्तोऽतिलुब्ध-भूपश्च ॥१२॥
किं लघुताया मूलम्? प्राकृतपुरुषेषु यत् कृतं पापम्।
संसारे किं सारम्? गङ्गाऽनङ्गारि-सेवनं सततम् ॥१३॥
निर्मलमुक्ता माला सत्कविता चातुरी वाचाम्।
या विद्यापति-रचिता, प्रश्नोत्तरमालिका सेयम् ॥१४॥

महाकवेः उपरितनं प्रत्येकं पद्यम् कवि-कर्म-कौशलेन जीवन-यात्रायां सुपथं प्रदर्शयत् अपूर्वां मनोहारितामादधातीतिशम्।

१८. ज्योतिस्सार-समुच्चयः

महाकवि-विद्यापतेः कर्मकाण्ड-विषयकग्रन्थेषु ज्योतिष-शास्त्रीय-विषयाणां समुल्लेखाद् विवेचनाच्च ज्योतिर्विज्ञानेऽपि एतस्य विशिष्टं ज्ञानमासीदति निश्चिन्वन्ति विपश्चितः। विद्वद्वरेण पण्डितश्रीगङ्गाधरमिश्रेण जयौतिषशास्त्रमर्मज्ञेन, कृत्यसारसमुच्चयपरिशिष्ट-प्रकरणे नवान्न-भोजन-प्रसङ्गे तत्काल-विनिर्णय-

क्रमे महाकवि-विद्यापति-विरचितं—"ज्योतिः सारसमुच्चय"- ग्रन्थस्य सुस्पष्टतया समुल्लेखः कृतः—

तथा च कविवरपण्डित-विद्यापतिठक्कुर-कृत-ज्योतिःसारसमुच्चये—

वृश्चिकस्थे रवौ त्यक्त्वा वासराणि त्रयोदश।

नवान्नैर्विहितं श्राद्धं धनुष्येव कृतं भवेत्।।इति

डॉ० शशिनाथझाशर्मणा प्रकाशितायां महाकवि-विद्यापतेः "कीर्तिपताकायाम्" विद्यापति-रचना-समुल्लेखन-क्रमे ज्योतिस्सारसमुच्चयग्रन्थोऽपि महाकवेरेका कृतिरिति प्रतिपादितम् ।

एवञ्च ज्योतिस्सारसमुच्चयग्रन्थोऽपि महाकविना विरचित इति निश्चिन्वता मया श्रुतनाममात्रस्यास्य ग्रन्थस्य प्रतिपाद्य-विषय-सम्बन्धे वाचंयमेन भूयते इति शम् ।

१९. चिकित्साञ्जनम्

लखनऊ-केन्द्रीयसंस्कृतविद्यापीठप्रधानाचार्येण डॉ० उमारमणझा-शर्मणा विद्यापति-कृत-चिकित्साञ्जनग्रन्थं सम्पाद्य प्रकाशनार्थं तत्पाण्डुलिपिः संस्थाने प्रस्तुतेति विज्ञाय महाकवेश्चिकित्साशास्त्रेऽपि ग्रन्थो विद्यते इति निश्चीयते । किन्तु एतस्यापि ग्रन्थस्य नाम मात्रं श्रुतमिति अत्रापि तत्प्रतिपाद्य-विषये मौनमेवालम्ब्यते इतिशम् ।

परिशीलित-सन्दर्भ-ग्रन्थाः

१. **कर्णाटराजतरङ्गिणी**—डॉ. काशीनाथ मिश्रः, Genral Book Agency, Patna, १९९४

२. **कल्याणदेवताङ्क**—गीताप्रेस, गोरखपुर, वर्ष ६४ विशेषाङ्क। प्रकाशनवर्ष १९९० **मिथिला के ग्रामदेवता** ले. डा. जयमन्तमिश्र

३. **कविता कुसुम**—दरभंगा प्रेस कम्पनी प्रा० लि० दरभंगा स० श्री रमानाथ झा

४. **कीर्तिपताका**—विद्यापतिः, सं० डॉ. शशिनाथझा, नागप्रकाशन, दिल्ली, १९९२

५. **कीर्तिलता**—विद्यापतिः, सं० बाबूराम सक्सेना, प्रयाग

६. **कृत्यसार-समुच्चयः** —सं० पं० गङ्गाधरमिश्र, चौखम्बा सं० सीरीज, वाराणसी, १९३८

७. **गयापत्तलकम्**—विद्यापतिः, सं० डा. शशिनाथ झा, पाण्डुलिपिः।

८. **गोरक्षविजयनाटकम्**—विद्यापतिः (मिथिलापरम्परागतनाटकान्तर्गतम्) सं० डा. शशिनाथझा, का०सि०द० संस्कृत विश्वविद्यालय, १९८६

९. **चिकित्साञ्जनम्**—विद्यापतिः, सं. डा. उमारमणझा पाण्डुलिपि

१०. **ज्यौतिषसारसमुच्चयः**—विद्यापतिः

११. **दानवाक्यावली**—विद्यापतिः विद्यापतिग्रन्थमाला का. सि. द. संस्कृत विश्वविद्यालय।

१२. **दुर्गाभक्तितरङ्गिणी**—विद्यापतिः

१३. **पुरुषपरीक्षा**—विद्यापतिः, सं० प्रो० रमानाथझा, पटना विश्वविद्यालय प्रकाशन, १९६०

१४. **प्रश्नोत्तरमालिका**—विद्यापतिः, सम्पादक डा. शशिनाथ झा, चेतनासमिति, पटना-स्मारिका-१९९१

१५. **भारत विभूति विद्यापति**—ले. सीतारामझा, बिचौली, इटावा, १९८५

१६. **भूपरिक्रमणम्**—विद्यापतिः सं० डॉ. मुनीश्वर झा, मिथिला सांस्कृतिक परिषद्, कलकत्ता, १९७६

१७. **मणिमञ्जरीनाटिका**—विद्यापतिः

१८. **मिथिलाक इतिहास**—ले० डॉ० उपेन्द्र ठाकुर, मैथिली अकादमी, पटना १९८०

१९. **मिथिला भाषामय इतिहास**—ले० म० म० मुकुन्दझा बक्शी । विद्याविलासप्रेस, गोपाल मन्दिर लेन, वाराणसी ।

२०. **मिथिला तत्त्वविमर्शः**, ले. पं. परमेश्वर झा, श्रीपरमेश्वर पुस्तकालय, तरौनी, १९४९

२१. **मिथिलाकपरम्परागत-नाटक-संग्रहः**, सं. डॉ. शशिनाथ झा, का. द. सं. विश्वविद्यालय, दरभंगा, १९८६

२२. **मिथिलाक विभूति**—म.म. शङ्करमिश्र, ले. डॉ. त्रिलोकनाथ झा, मैथिली अकादमी, पटना १९८३

२३. **मैथिली अभिलेख गीतमाला**— सं. डॉ. जयमन्त मिश्र, मैथिली अकादमी, पटना १९७७

२४. **मैथिली नाटक पर संस्कृतक प्रभाव**, ले. डॉ. जयमन्त मिश्र, मैथिली अकादमी, पटना १९७८

२५. **राजनीति-रत्नाकर-चण्डेश्वरठाकुर**— व्या. श्री वाचस्पति गैरोसा एवं पं. तारणीश झा, चौखम्भा संस्कृत संस्थान, वाराणसी, १९७०

२६. **लिखनावली**— इन्द्रालय प्रकाशन पटना सं. डॉ. इन्द्रकान्त झा, १९६९

२७. **वर्षकृत्यम्**—विद्यापतिः पाण्डुलिपिः

२८. **विद्यापति गीत-शती**— साहित्य अकादमी, सं. उमानाथ झा, नई दिल्ली, १९७२

२९. **विद्यापति पदावली**— सं. कुमुद विद्यालंकार, जयवंसी झा, रीगल ब्रुक डिपो, दिल्ली

३०. **विद्यापतिशकतम्**— डॉ. काशीनाथ मिश्र, जानकी प्रकाशन, पटना १९७७

३१. **विद्यापति-पदावली में लोक-संस्कृति का चित्रण**— कल्पना-तीर्थ, ले. डॉ. प्रमोद कुमार सिंह, दलासिंहसराय, १९७०

३२. **विद्यापतिक श्रृंगारिक पदक काव्याशास्त्रीय अध्ययन**— ले. डॉ. देवेन्द्र झा, अनुपम प्रकाशन, पटना १९७९

३३. **विद्यापतियुग और साहित्य**— भाग-१, ले. डॉ. इन्द्रकान्त झा, इन्द्रालय प्रकाशन, पटना, १९८४

३४. **विद्यापति-गीत संग्रह**— सं. श्री सुभद्र झा, मोतीलाल बनारसीदास, पटना

३५. **शैवसर्वस्वसारः (विभागसारः)** —विद्यापतिः, विद्यापति संस्कृतग्रंथावली भाग-१, डॉ. जयमन्त मिश्र, का. द. सं. विश्वविद्यालय, दरभंगा १९८०

३६. **शैवसर्वस्वसारप्रमाणभूतपुराणसंग्रहः**— विद्यामतिः, विद्यापति संस्कृत ग्रंथावली, का. द. सं. विश्वविद्यालय, दरभंगा, १९८१

३७. **विभागसार**— सं. श्रीं गोविन्द झा, मैथिली अकादमी पटना, १९७६

38. **Dhittula In the Age of Vidyapati**— Dr. R. Chaudhuri, chowkhamba Orientalic Varanasi, 1976

39. **Vidyapati**— Dr. Ramanatha Jha, Sahitya Akademy, New Delhi 1972

40. **Vidyapati—A Political Analysis**— Dr. Shankar Kumar Jha, Shivani Prakashan Darbhanga, 1983


41. **A Study of Vidyapati's Danavakyavali**— Dr. Shankar Kumar Jha, Bulletin of the Mithila Research Institute, Darbhanga

42. **Vidyapati's Treatment of Diplomacy and Inter state Relations**— Dr. Shankar Kumar Jha, Political Scientist, January-June, 1967

43. **Usury In Medieval Mithila Based on Vidyapati's Likhanavali**— Dr. Shankar Kumar Jha, Journal of Asiatic Society of Bengal

44. **Vidyapati's Ideal of Rajadharma**— Dr. Shankar Kumar Jha, Ramanatha Jha Abhinandan Grantha Darbhanga, 1968







राष्ट्रिय-संस्कृत-संस्थानम्

ए-४०, विशाल एन्कलेव, राजा गार्डन,
नई दिल्ली-११००२७ (भारत)